# तैत्तिरीयोपनिषत्

द्वितीयवल्ली

# आनन्दवल्ली

## प्रथमोऽनुवाकः

## शान्तिपाठः

**ॐ शं नो मित्रश्शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मावतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥ १॥**

**ॐ शान्तिः शान्तिः शान्तिः॥**

१) शन्नो मित्र इत्याद्यतीत-विद्या-प्राप्त्युपसर्ग-प्रशमनार्था शान्तिः पठिता।

इदानीं तु वक्ष्यमाण-ब्रह्म-विद्या-प्रत्युपसर्गोपशमनार्था शान्तिः पठ्यते - 'शन्नो मित्रः' इति।

'स ह नाववतु' इति च। 'शन्नो मित्रः' इत्यादि पूर्ववत्स्पष्टम्।।

**सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै॥**

**ॐ शान्तिः शान्तिः शान्तिः॥**

**शिष्यस्य प्रार्थना**

२) सह नाववतु। नौ शिष्याचार्यौ सह एव अवतु रक्षतु। सह नौ भुनक्तु भोजयतु।

सह वीर्यं विद्यादि-निमित्तं सामर्थ्यं करवावहै निर्वर्त्तयावहै।

तेजस्वि नौ आवयोः तेजस्विनोः अधीतं स्वधीतम् अस्तु अर्थ-ज्ञान-योग्यम् अस्तु इत्यर्थः।

मा विद्विषावहै विद्या-ग्रहण-निमित्तं शिष्यस्य आचार्यस्य वा प्रमाद-कृताद् अन्यायाद् अपराधाद् विद्वेषः प्राप्तः,

तच्छमनाय इयम् आशीः 'माविद्विषावहै' इति। मैव इतरेतरं विद्वेषमापद्यावहै।

शान्तिः शान्तिः शान्तिरिति त्रिर्वचनम् उक्तार्थम्। वक्ष्यमाण-विद्या-विघ्न-प्रशमनार्थं च इयं शान्तिः।

अविघ्नेन ह्यात्मविद्या-प्राप्तिः आशास्यते। तन्मूलं हि परं श्रेयः इति।

**सम्बन्ध-भाष्यम्**

**ग्रन्थसम्बन्धः - ब्रह्मविद्यायाः आत्यन्तिक-संसाराभावः**

३) संहितादि-विषयाणि कर्मभिः अविरुद्धानि उपासनान्युक्तानि।

अनन्तरं च अन्तः-सोपाधिकात्म-दर्शनम् उक्तं व्याहृति-द्वारेण स्वाराज्य-फलम्।

न च एतावता अशेषतः संसार-बीजस्य उपमर्दनमस्ति, इत्यतः अशेषोपद्रव-बीजस्य अज्ञानस्य निवृत्त्यर्थं विधूत-सर्वोपाधि-विशेषात्म-दर्शनार्थमिदम् आरभ्यते ‘ब्रह्मविदाप्नोति परम्’ इत्यादि।

**विद्यासम्बन्धप्रयोजनोपन्यासः**

४) प्रयोजनं च अस्याः ब्रह्म-विद्यायाः अविद्या-निवृत्तिः। ततः आत्यन्तिकः संसाराभावः।

वक्ष्यति च - “विद्वान्न बिभेति कुतश्चन” (तै. २.९) इति। संसार-निमित्ते च सति, “अभयं प्रतिष्ठां विन्दते” (तै. २.७) इत्यनुपपन्नम्। “कृताकृते पुण्य-पापे न तपतः” (तै. २.९) इति च।

अतोऽवगम्यते अस्माद्विज्ञानात् सर्वात्म-ब्रह्म-विषयाद् आत्यन्तिकः संसाराभावः इति।

स्वयमेव चाह प्रयोजनम् - “ब्रह्मविदाप्नोति परम्” इति, आदौ एव सम्बन्ध-प्रयोजन-ज्ञापनार्थम्।

निर्ज्ञातयोर्हि सम्बन्ध-प्रयोजनयोः, विद्या-श्रवण-ग्रहण-धारणाभ्यासार्थं प्रवर्त्तते।

श्रवणादि-पूर्वकं हि विद्या-फलम्, “श्रोतव्यो मन्तव्यो निदिध्यासितव्यः” (बृ. २.४.५) इत्यादि-श्रुत्यन्तरेभ्यः।।

प्रथमोऽनुवाकः

ब्रह्मविदाप्नोति परम्। तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान्सह। ब्रह्मणा विपश्चितेति। तस्माद्वा एतस्मादात्मन आकाशस्संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः। स वा एष पुरुषोऽन्नरसमयः। तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ २.१॥

**आनन्दवल्ल्याः सूत्रभूतवाक्यस्य अर्थः**

५) ब्रह्मविद् ‘ब्रह्म’ इति वक्ष्यमाण-लक्षणम्। बृहत्तमत्वाद् ब्रह्म। तद्वेत्ति विजानाति इति ब्रह्म-वित्।

आप्नोति प्राप्नोति परं निरतिशयम्। तदेव ब्रह्म परम्। न हि अन्यस्य विज्ञानादन्यस्य प्राप्तिः। स्पष्टं च श्रुत्यन्तरं

ब्रह्म-प्राप्तिमेव ब्रह्म-विदः दर्शयति - “स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति” (मु. ३.२.९) इत्यादि।

**आप्नोति-शब्दस्य औपचारिकार्थ-प्रदर्शनम्**
**पूर्वपक्षः**

६) ननु सर्वगतं सर्वस्य च आत्मभूतं ब्रह्म वक्ष्यति। अतो नाप्यम्। आप्तिश्च अन्यस्यान्येन परिच्छिन्नस्य च

परिच्छिन्नेन दृष्टा। अपरिच्छिन्नं सर्वात्मकं च ब्रह्म, इत्यतः परिच्छिन्नवद् अनात्मवच्च तस्य आप्तिः अनुपपन्ना।

**सिद्धान्तः**
**अविद्यया अनाप्तिः**
७) नायं दोषः। कथम्? दर्शनादर्शनापेक्षत्वाद् ब्रह्मणः आप्त्यनाप्त्योः।

परमार्थतो ब्रह्म-स्वरूपस्यापि सतः अस्य जीवस्य भूत-मात्रा-कृत-बाह्य-परिच्छिन्नान्नमयाद्यात्म-दर्शिनः, तदासक्त-चेतसः – प्रकृत-सङ्ख्या-पूरणस्य आत्मनोऽव्यवहितस्यापि बाह्य-सङ्ख्येय-विषयासक्त-चित्ततया स्वरूपाभाव-दर्शनवत् – परमार्थ-ब्रह्म-स्वरूपाभाव-दर्शन-लक्षणया अविद्यया अन्नमयादीन् बाह्यान् अनात्मनः आत्मत्वेन प्रतिपन्नत्वात्, 'अन्नमयाद्यनात्मभ्यः नान्योऽहमस्मि' इत्यभिमन्यते। एवम् अविद्यया आत्मभूतमपि ब्रह्म अनाप्तं स्यात्।

**विद्यया औपचारिकप्राप्तिः**
८) तस्य एवमविद्यया अनाप्त-ब्रह्म-स्वरूपस्य – प्रकृत-सङ्ख्या-पूरणस्य आत्मनः अविद्यया अनाप्तस्य सतः केनचित्स्मारितस्य पुनः तस्यैव विद्यया आप्तिः यथा, तथा – श्रुत्युपदिष्टस्य सर्वात्म-ब्रह्मणः आत्मत्व-दर्शनेन

विद्यया तदाप्तिः उपपद्यते एव।

**'ब्रह्मविदाप्नोति परम्' इति ब्राह्मणवाक्योक्तेऽर्थे 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि-ऋगुदाहरणावतरणिका**

९) 'ब्रह्मविद् आप्नोति परम्' इति वाक्यं सूत्र-भूतं सर्वस्य वल्ल्यर्थस्य।

1) 'ब्रह्मविद् आप्नोति परम्' इत्यनेन वाक्येन वेद्यतया सूत्रितस्य ब्रह्मणः अनिर्धारित-स्वरूप-विशेषस्य सर्वतो व्यावृत्त-स्वरूप-विशेष-समर्पण-समर्थस्य लक्षणस्य अभिधानेन स्वरूप-निर्धारणाय,

2) अविशेषेण च उक्त-वेदनस्य ब्रह्मणो वक्ष्यमाण-लक्षणस्य विशेषेण प्रत्यगात्मतया अनन्य-रूपेण विज्ञेयत्वाय,

3) ब्रह्म-विद्या-फलं च ब्रह्म-विदो यत्पर-ब्रह्म-प्राप्ति-लक्षणमुक्तम्, सः सर्वात्मभावः सर्व-संसार-धर्मातीत-ब्रह्म-स्वरूपमेव नान्यत्, इत्येतत्प्रदर्शनाय च - एषा ऋगुदाह्रियते 'तदेषाऽभ्युक्ता' इति।

तत् तस्मिन् एव ब्राह्मण-वाक्योक्तेऽर्थे एषा ऋग् अभ्युक्ता आम्नाता।

**उदाहृत-ऋचि ब्रह्मलक्षणवाक्यम् ''सत्यं ज्ञानमनन्तं ब्रह्म''**
**लक्षणवाक्ये विशेषणानां कृत्यम्**
१०) 'सत्यं ज्ञानमनन्तं ब्रह्म' इति ब्रह्मणो लक्षणार्थं वाक्यम्।

सत्यादीनि हि त्रीणि विशेषणार्थानि पदानि विशेष्यस्य ब्रह्मणः। विशेष्यं ब्रह्म, विवक्षिततत्वाद् वेद्यतया।

विशेषण-विशेष्यत्वादेव सत्यादीनि एकविभक्त्यन्तानि पदानि समानाधिकरणानि।

सत्यादिभिः त्रिभिः विशेषणैः विशेष्यमाणं ब्रह्म विशेष्यान्तरेभ्यः निर्धार्यते।

एवं हि तज्ज्ञातं भवति, यदन्येभ्यः निर्धारितम्। यथा लोके 'नीलं महत्सुगन्धि उत्पलम्' इति।

**पूर्वपक्षः**
**अद्वितीय-ब्रह्मविषये विशेषणानर्थवत्वम्**
११) ननु विशेष्यं विशेषणान्तरं व्यभिचरद् विशेष्यते, यथा नीलं रक्तं च उत्पलमिति।

यदा ह्यनेकानि द्रव्याणि, एकजातीयानि, अनेक-विशेषण-योगीनि च, तदा विशेषणस्य अर्थवत्वम्।

न हि एकस्मिन्नेव वस्तुनि विशेषणान्तरायोगात्। यथा ‘असौ एकः आदित्यः’ इति।

तथा एकमेव च ब्रह्म, न ब्रह्मान्तराणि, येभ्यः विशेष्येत नीलोत्पलवत्।

**सिद्धान्तः**
**विशेषणानां लक्षणार्थत्वम्, लक्षणस्य लक्षणं च**
१२) न। लक्षणार्थत्वाद् विशेषणानाम्। नायं दोषः। कस्मात्? यस्माद् लक्षणार्थ-प्रधानानि विशेषणानि।

न विशेषण-प्रधानानि एव। कः पुनः लक्षण-लक्ष्ययोः विशेषण-विशेष्ययोः वा विशेषः? इत्युच्यते -

सजातीयेभ्यः एव निवर्त्तकानि विशेषणानि विशेष्यस्य। लक्षणं तु सर्वतः एव।

यथा “अवकाश-प्रदात्राकाशम्” इति। लक्षणार्थं च वाक्यमित्यवोचाम।

**सत्यादिशब्दानां परस्परनिरपेक्षत्वेन कृत्यम्**
सत्यादि-शब्दाः न परस्परं सम्बध्यन्ते, परार्थत्वात्। विशेष्यार्था हि ते।

अतः एव ऐकैको विशेषण-शब्दः परस्परं निरपेक्षो ब्रह्म-शब्देन सम्बध्यते - 'सत्यं ब्रह्म', 'ज्ञानं ब्रह्म', 'अनन्तं ब्रह्म' इति।

**सत्यमित्यस्य पदस्य व्याख्यानम्**

१३) 'सत्यम्' इति। यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति, तत्सत्यम्। यद्रूपेण निश्चितं यत् तद्रूपं व्यभिचरद् अनृतम् इत्युच्यते। अतो विकारोऽनृतम्, "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छा. ६.१.४)। एवं सदेव सत्यम् इत्यवधारणात्। अतः 'सत्यं ब्रह्म' इति ब्रह्म विकाराद् निवर्त्तयति।

**ज्ञानमित्यस्य पदस्य व्याख्यानम्**

१४) अतः कारणत्वं प्राप्तं ब्रह्मणः। कारणस्य च कारकत्वम्। वस्तुत्वात्, मृद्वद् अचिद्रूपता च प्राप्ता। अतः इदमुच्यते 'ज्ञानं ब्रह्म' इति। ज्ञानं ज्ञप्तिः, अवबोधः। भाव-साधनो ज्ञान-शब्दः न तु ज्ञानकर्तृ, ब्रह्म-विशेषणत्वात् सत्यानन्ताभ्यां सह। न हि सत्यता, अनन्तता च ज्ञान-कर्तृत्वे सति उपपद्यते।

ज्ञान-कर्तृत्वेन हि विक्रियमाणं कथं सत्यं भवेत्, अनन्तं च? यद्धि न कुतश्चित् प्रविभज्यते, तदनन्तम्।

ज्ञान-कर्तृत्वे च ज्ञेय-ज्ञानाभ्यां प्रविभक्तम् इत्यनन्तता न स्यात्। "यत्र... नान्यद्विजानाति स भूमा।

अथ यत्र...अन्यद्विजानाति तदल्पम्" (छा. ७.२४.१) इति श्रुत्यन्तरात्।

**आत्मनि ज्ञानकर्तृत्वप्रतिषेधः**
**आक्षेपः**
१५) "नान्यद्विजानाति" इति विशेष-प्रतिषेधाद् 'आत्मानं विजानाति' इति चेत्।

**समाधानम्**
न। भूम-लक्षण-विधि-परत्वाद् वाक्यस्य।

"यत्र नान्यत् पश्यति" (छा. ७.२४.१) इत्यादि भूम्नो लक्षण-विधि-परं वाक्यम्।

यथा-प्रसिद्धमेव अन्योऽन्यत् पश्यति इत्येतदुपादाय, 'यत्र तन्नास्ति स भूमा' इति भूम-स्वरूपं तत्र ज्ञाप्यते।

अन्य-ग्रहणस्य प्राप्त-प्रतिषेधार्थत्वात्, न स्वात्मनि क्रियास्तित्व-परं वाक्यम्।

स्वात्मनि च भेदाभावाद् विज्ञानानुपपत्तिः। आत्मनश्च विज्ञेयत्वे ज्ञात्रभाव-प्रसङ्गः। ज्ञेयत्वेनैव विनियुक्तत्वात्।

**आक्षेपः**
एक एव आत्मा ज्ञेयत्वेन ज्ञातृत्वेन च उभयथा भवति इति चेत्।

**समाधानम्**
न युगपत्, अनंशत्वात्। न हि निरवयवस्य युगपद् ज्ञेय-ज्ञातृत्वोपपत्तिः।

आत्मनश्च घटादिवद् विज्ञेयत्वे ज्ञानोपदेशानर्थक्यम्। न हि घटादिवत् प्रसिद्धस्य ज्ञानोपदेशः अर्थवान्। तस्माद्

ज्ञातृत्वे सति आनन्त्यानुपपत्तिः।

**ज्ञानशब्दस्य भावसाधनत्वेन उपसंहारः**
१६) सन्मात्रत्वं च अनुपपन्नम्, ज्ञान-कर्तृत्वादि-विशेषवत्वे सति।

सन्मात्रत्वं च सत्यत्वम्, “तत्सत्यम्” (छा. ६.८.७) इति श्रुत्यन्तरात्।

तस्मात् सत्यानन्त-शब्दाभ्यां सह विशेषणत्वेन ज्ञान-शब्दस्य प्रयोगाद् भाव-साधनो ज्ञान-शब्दः।

“ज्ञानं ब्रह्म” इति कर्तृत्वादि-कारक-निवृत्यर्थम् मृदादिवद् अचिद्रूपता-निवृत्यर्थं च प्रयुज्यते।

**अनन्तमित्यस्य पदस्य अवतरणिका**

१७) ‘ज्ञानं ब्रह्म’ इति वचनात्प्राप्तम् अन्तवत्वम्, लौकिकस्य ज्ञानस्य अन्तवत्व-दर्शनात्।

अतः तन्निवृत्यर्थमाह - ‘अनन्तम्’ इति।

**लक्षणवाक्यस्य शून्यार्थताशङ्का परिहारश्च**

**पूर्वपक्षः**

१८) सत्यादीनाम् अनृतादि-धर्म-निवृत्ति-परत्वाद् विशेष्यस्य च ब्रह्मणः उत्पलादिवद् अप्रसिद्धत्वात्, “मृग-

तृष्णाम्भसि स्नातः खपुष्प-कृत-शेखरः। एष वन्ध्या-सुतो याति शश-शृङ्ग-धनुर्धरः” इतिवत् शून्यार्थता एव प्राप्ता

सत्यादि-वाक्यस्य इति चेत्।

**सिद्धान्तः**

**ब्रह्मणः लक्ष्यत्वाद् न शून्यता**

१९) न। लक्षणार्थत्वात्। विशेषणत्वेऽपि च सत्यादीनां लक्षणार्थ-प्राधान्यम् इत्यवोचाम (भाष्य-भागः २.१२)।

शून्ये हि लक्ष्ये, अनर्थकं लक्षण-वचनम्। अतः लक्षणार्थत्वाद् मन्यामहे न शून्यार्थता इति।

विशेषणार्थत्वेऽपि च सत्यादीनां स्वार्थापरित्याग एव। शून्यार्थत्वे हि सत्यादि-शब्दानां विशेष्य-नियन्तृत्वानुपपत्तिः। सत्याद्यर्थैः अर्थवत्वे तु तद्विपरीत-धर्मवद्भ्यः विशेष्येभ्यः ब्रह्मणो विशेष्यस्य नियन्तृत्वम् उपपद्यते। ब्रह्म-शब्दोऽपि स्वार्थेन अर्थवानेव। तत्र अनन्त-शब्दः अन्तवत्व-प्रतिषेध-द्वारेण विशेषणम्। सत्य-ज्ञान-शब्दौ तु स्वार्थ-समर्पणेनैव विशेषणे भवतः।

**आत्मैक्याद् ब्रह्मणः नासत्वम्**

२०) “तस्माद्वा एतस्मादात्मनः” (तै. २.१) इति ब्रह्मण्येव आत्म-शब्द-प्रयोगाद् वेदितुः आत्मा एव ब्रह्म। “एतमानन्दमयमात्मानमुपसङ्क्रामति” (तै. २.८) इति च आत्मतां दर्शयति। तत्प्रवेशाच्च।

“तत्सृष्ट्वा तदेवानुप्राविशत्” (तै. २.६) इति च तस्यैव जीव-रूपेण शरीर-प्रवेशं दर्शयति।

अतो वेदितुः स्वरूपं ब्रह्म।

**पूर्वपक्षः**
**ब्रह्मणः वेदितुः आत्मत्वे सति ज्ञानकर्तृत्वमिति**
२१) एवं तर्हि आत्मत्वाद् ज्ञान-कर्तृत्वम्। आत्मा ज्ञाता इति हि प्रसिद्धम्। “सोऽकामयत” (तै. २.६) इति च

कामिनो ज्ञान-कर्तृत्व-प्रसिद्धिः। अतो ज्ञान-कर्तृत्वात् ‘ज्ञप्तिः ब्रह्म’ इति अयुक्तम्। अनित्यत्व-प्रसङ्गाच्च।

यदि नाम ज्ञप्तिः ज्ञानमिति भाव-रूपता ब्रह्मणः, तथापि अनित्यत्वं प्रसज्येत। पारतन्त्र्यं च।

धात्वर्थानां कारकापेक्षत्वात्, ज्ञानं च धात्वर्थः। अतोऽस्य अनित्यत्वं पर-तन्त्रता च।

**सिद्धान्तः**
**ब्रह्म ज्ञानस्वरूपम् न तु ज्ञानकर्त्राद्यन्यतमः इति**
२२) न। स्वरूपाव्यतिरेकेण कार्यत्वोपचारात्। आत्मनः स्वरूपं ज्ञप्तिः, न ततो व्यतिरिच्यते। अतो नित्या एव।

तथापि बुद्धेः उपाधि-लक्षणायाः चक्षुरादि-द्वारैः विषयाकारेण परिणामिन्याः ये शब्दाद्याकारावभासाः ते आत्म-विज्ञानस्य विषय-भूताः उत्पद्यमानाः एव आत्म-विज्ञानेन व्याप्ताः उत्पद्यन्ते।

तस्माद् आत्म-विज्ञानावभासाः च ते विज्ञान-शब्द-वाच्याश्च, धात्वर्थ-भूताः, आत्मन एव धर्माः विक्रिया-रूपाः इत्यविवेकिभिः परिकल्प्यन्ते। यत्तु ब्रह्मणो विज्ञानम्, तत् सवितृ-प्रकाशवद् अग्न्युष्णवच्च ब्रह्म-स्वरूपाव्यतिरिक्तं स्वरूपमेव। तन्न कारणान्तर-सव्यपेक्षम्, नित्यात्म-स्वरूपत्वात्।

**ज्ञानस्वरूपत्वे अपि ब्रह्मणः नित्यत्वम्**

२३) सर्व-भावानां च तेन अविभक्त-देश-कालत्वात्, काल-आकाशादि-कारणत्वात्, निरतिशय-सूक्ष्मत्वाच्च न तस्य अन्यदविज्ञेयं, सूक्ष्मं, व्यवहितं, विप्रकृष्टं, भूतं, भवद्भविष्यद्वा अस्ति।

तस्मात्तु सर्वज्ञं तद् ब्रह्म। मन्त्रवर्णाच्च - "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः।

स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्” (श्वे. ३.१९) इति।

“न हि विज्ञातुः विज्ञातेः विपरिलोपो विद्यते, अविनाशित्वात् न तु तद् द्वितीयमस्ति” (बृ. ४.३.३०) इत्यादि-

श्रुतेः च। विज्ञातृ-स्वरूपाव्यतिरेकात् करणादि-निमित्तानपेक्षत्वाच्च ब्रह्मणो ज्ञान-स्वरूपत्वेऽपि नित्यत्व-प्रसिद्धिः।

अतः नैव धात्वर्थः तत्, अविक्रिया-रूपत्वात्। अत एव च न ज्ञान-कर्तृ।

**सत्यादिशब्दलक्ष्यं ब्रह्म न तु तद्वाच्यम्**

२४) तस्मादेव च न ज्ञान-शब्द-वाच्यमपि तद् ब्रह्म। तथापि तदाभास-वाचकेन बुद्धि-धर्म-विषयेण ज्ञान-शब्देन

तल्लक्ष्यते। न तु उच्यते। शब्द-प्रवृत्ति-हेतु-जात्यादि-धर्म-रहितत्वात् सत्यानन्त-शब्दाभ्यां सामानाधिकरण्यात्।

तथा सत्य-शब्देनापि। सर्व-विशेष-प्रत्यस्तमित-स्वरूपत्वाद् ब्रह्मणः।

बाह्य-सत्ता-सामान्य-विषयेण सत्य-शब्देन लक्ष्यते ‘सत्यं ब्रह्म’ इति। न तु सत्य-शब्द-वाच्यम् एव ब्रह्म।

**सत्यादिलक्षणशब्दानां कृत्यम्**

२५) एवं सत्यादि-शब्दाः इतरेतर-सन्निधौ अन्योन्य-नियम्य-नियामकाः सन्तः सत्यादि-शब्द-वाच्याद् निवर्त्तकाः ब्रह्मणः लक्षणार्थाः च भवन्तीति। अतः सिद्धम्, "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (तै. २.४), "अनिरुक्तेऽनिलयने" (तै. २.७) इति च अवाच्यत्वम्। नीलोत्पलवद् अवाक्यार्थत्वं च ब्रह्मणः।

**ब्रह्मणः उपलब्धिस्थानम्**

२६) तद् यथा-व्याख्यातं ब्रह्म यो वेद विजानाति निहितं स्थितम् गुहायाम्।

१) गूहतेः संवरणार्थस्य 'निगूढाः अस्यां ज्ञान-ज्ञेय-ज्ञातृ-पदार्थाः' इति गुहा बुद्धिः। निगूढौ अस्यां भोगापवर्गौ पुरुषार्थौ इति वा। तस्यां परमे प्रकृष्टे व्योमन् व्योम्नि आकाशे अव्याकृताख्ये। तद्धि परमं व्योम "एतस्मिन्नु खल्वक्षरे गार्ग्याकाशः" (बृ. ३.८.११) इति अक्षर-सन्निकर्षात्।

२) ‘गुहायां व्योमन् ‘इति वा सामानाधिकरण्याद् अव्याकृताकाशमेव गुहा।

तत्रापि निगूढाः सर्वे पदार्थाः त्रिषु कालेषु, कारणत्वात्, सूक्ष्मतरत्वाच्च। तस्मिन् अन्तर्निहितं तद् ब्रह्म।

३) हार्दमेव तु परमं व्योम इति न्याय्यम्। विज्ञानाङ्गत्वेन व्योम्नः विवक्षितत्वात्।

“यो वै स बहिर्धा पुरुषादाकाशः” (बृ. ३.१२.७), “यो वै सोऽन्तः पुरुष आकाशः” (बृ. ३.१२.८),

“योऽयमन्तर्हृदय आकाशः” (बृ. ३.१२.९) इति श्रुत्यन्तरात् प्रसिद्धं हार्दस्य व्योम्नः परमत्वम्।

तस्मिन् हार्दे व्योम्नि या बुद्धिः गुहा, तस्यां निहितं ब्रह्म, तद्वृत्या विविक्ततया उपलभ्यते इति।

न हि अन्यथा विशिष्ट-देश-काल-सम्बन्धः अस्ति ब्रह्मणः, सर्व-गतत्वाद् निर्विशेषत्वाच्च।

**ब्रह्मविद्यायाः फलम्**

२७) सः एवं ब्रह्म विजानन्। किम्? इत्याह - अश्नुते भुङ्क्ते सर्वान् निरवशिष्टान् कामान् काम्यान् भोगान्

इत्यर्थः। किम् अस्मदादिवत् पुत्र-स्वर्गादीन् पर्यायेण? न इत्याह - सह युगपद् एक-क्षणोपारूढानेव एकया

उपलब्ध्या, सवितृ-प्रकाशवद् नित्यया, ब्रह्म-स्वरूपाव्यतिरिक्तया, यामवोचाम "सत्यं ज्ञानमनन्तम्" इति।

एतत् तदुच्यते - ब्रह्मणा सह इति। ब्रह्म-भूतः विद्वान् ब्रह्म-स्वरूपेणैव सर्वान् कामान् सह अश्नुते।

न तथा यथा उपाधि-कृतेन स्वरूपेण आत्मना जल-सूर्यकादिवत् प्रतिबिम्ब-भूतेन सांसारिकेण

धर्मादि-निमित्तापेक्षान् चक्षुरादि-करणापेक्षान् च कामान् पर्यायेण अश्नुते लोकः।

कथं तर्हि? यथोक्तेन प्रकारेण सर्वज्ञेन, सर्वगतेन, सर्वात्मना, नित्य-ब्रह्मात्म-स्वरूपेण धर्मादि-निमित्त-अनपेक्षान्

चक्षुरादि-करण-निरपेक्षान् च सर्वान् कामान् सहैव अश्नुते इत्यर्थः।

विपश्चिता मेधाविना सर्वज्ञेन। तद्धि वैपश्चित्यम्, यत्सर्वज्ञत्वम्। तेन सर्वज्ञ-स्वरूपेण ब्रह्मणा अश्नुते इति।

इति-शब्दः मन्त्र-परिसमाप्त्यर्थः।

**उत्तरग्रन्थसम्बन्धः**

२८) सर्वः एव वल्ल्यर्थः "ब्रह्मविदाप्नोति परम्" इति ब्राह्मण-वाक्येन सूत्रितः।

स च सूत्रितोऽर्थः संक्षेपतः मन्त्रेण व्याख्यातः। पुनस्तस्यैव विस्तरेण अर्थ-निर्णयः कर्तव्यः इति उत्तरः तद्वृत्ति-स्थानीयः ग्रन्थः आरभ्यते "तस्माद्वा एतस्मात्" इत्यादिः।

**ब्रह्मणः आनन्त्यप्रपञ्चः**

**देशतः अनन्तस्य आकाशस्य वस्तुतः कालतश्च न आनन्त्यं कार्यत्वात्**

२९) तत्र च 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्युक्तं मन्त्रादौ। तत्कथं 'सत्यम्' 'ज्ञानम्' 'अनन्तम्' च? इत्यत आह -

तत्र त्रिविधं हि आनन्त्यं देशतः, कालतः, वस्तुतश्च इति। तद्यथा देशतोऽनन्तः आकाशः।

न हि देशतः तस्य परिच्छेदोऽस्ति। न तु कालतश्च आनन्त्यम्, वस्तुतश्च आकाशस्य। कस्मात्? कार्यत्वात्।

**ब्रह्मणः अकार्यत्वात् वस्तुतः आनन्त्यं, सर्वानन्यत्वात् कालतश्च**

३०) नैवं ब्रह्मणः आकाशवत् कालतोऽप्यन्तवत्त्वम्, अकार्यत्वात्। कार्यं हि वस्तु कालेन परिच्छिद्यते।

अकार्यं च ब्रह्म। तस्मात् कालतोऽप्यनन्तम्। तथा वस्तुतः। कथं पुनः वस्तुतः आनन्त्यम्**?** सर्वानन्यत्वात्।

भिन्नं हि वस्तु वस्त्वन्तरस्य अन्तो भवति। वस्त्वन्तर-बुद्धिर्हि प्रसक्ता वस्त्वन्तरान्निवर्त्तते।

यतो यस्य बुद्धेः विनिवृत्तिः, स तस्य अन्तः। तद्यथा गोत्व-बुद्धिः अश्वत्वाद् विनिवर्त्तते इत्यश्वत्वान्तं गोत्वम्

इति अन्तवदेव भवति। स च अन्तः भिन्नेषु वस्तुषु दृष्टः। नैवं ब्रह्मणो भेदः। अतो वस्तुतोऽप्यानन्त्यम्।

कथं पुनः सर्वानन्यत्वम् ब्रह्मणः**?** इत्युच्यते - सर्व-वस्तु-कारणत्वात्।

सर्वेषां हि वस्तूनां कालाकाशादीनां कारणं ब्रह्म।

**ब्रह्मणः कारणत्वेपि वस्तुतः आनन्त्यं कार्यस्य अनृतत्वात्**
**आक्षेपः**

३१) कार्यापेक्षया वस्तुतोऽन्तवत्त्वमिति चेत्।

**समाधानम्**

न। अनृतत्वात् कार्य-वस्तुनः। न हि कारण-व्यतिरेकेण कार्यं नाम वस्तुतोऽस्ति, यतः कारण-बुद्धिः निवर्त्तेत।

“वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्” (छा. ६.१.४), एवं “सदेव...सत्यम्” (छा. अध्याय ६)

इति श्रुत्यन्तरात्। तस्माद् आकाशादि-कारणत्वाद् वस्तुतः तावद् अनन्तं ब्रह्म।

**ब्रह्मणः देशतः आनन्त्यम्, आनन्त्यविचारोपसंहारश्च**

३२) आकाशो ह्यनन्तः इति प्रसिद्धं देशतः। तस्य चायं कारणम्। तस्मात् सिद्धं देशतः आत्मनः आनन्त्यम्।

न हि असर्वगतात् सर्व-गतमुत्पद्यमानं लोके किञ्चिद् दृश्यते। अतो निरतिशयम् आत्मनः आनन्त्यं देशतः।

तथा अकार्यत्वात् कालतः। तद्भिन्न-वस्त्वन्तराभावाच्च वस्तुतः। अत एव निरतिशय-सत्यत्वम्।

**ब्रह्मात्मनोरैक्यम्**

३३) ‘तस्मात्’ इति मूल-वाक्य-सूत्रितं ‘ब्रह्म’ परामृश्यते।

‘एतस्मात्’ इति मन्त्र-वाक्येन अनन्तरं यथा-लक्षितम्।

यद्ब्रह्म आदौ ब्राह्मण-वाक्येन सूत्रितम्, यच्च 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यनन्तरमेव लक्षितम्, तस्मादेतस्माद्

ब्रह्मणः। आत्मनः आत्म-शब्द-वाच्यात्।

आत्मा हि तत् सर्वस्य, "तत्सत्यं स आत्मा" (छा. ६.८.७) इति श्रुत्यन्तरात्। अतो ब्रह्म आत्मा।

**आकाशादिभूतसृष्टिः**

३४) तस्मादेतस्माद् ब्रह्मणः आत्म-स्वरूपाद् आकाशः सम्भूतः समुत्पन्नः।

आकाशो नाम शब्द-गुणः अवकाशकरो मूर्त-द्रव्याणाम्।

तस्माद् आकाशात् स्वेन स्पर्श-गुणेन पूर्वेण च कारण-गुणेन शब्देन द्वि-गुणो वायुः 'सम्भूतः' इत्यनुवर्त्तते।

वायोः च स्वेन रूप-गुणेन पूर्वाभ्यां च त्रि-गुणः अग्निः सम्भूतः। अग्नेः स्वेन रस-गुणेन पूर्वैश्च त्रिभिः चतुर्गुणाः

आपः सम्भूताः। अद्भ्यः स्वेन गन्ध-गुणेन पूर्वैश्च चतुर्भिः पञ्च-गुणा पृथिवी सम्भूता।

**भौतिकप्रपञ्चसृष्टिः - अन्नमयकोशः**

३५) पृथिव्याः ओषधयः। ओषधीभ्योऽन्नम्। अन्नाद् रेतो-रूपेण परिणतात् पुरुषः शिरः-पाण्याद्याकृतिमान्।

स वै एषः पुरुषः अन्नरसमयः अन्न-रस-विकारः।

पुरुषाकृति-भावितं हि सर्वेभ्योऽङ्गेभ्यः तेजः सम्भूतं रेतो-बीजम् (द्र. ऐ. २.१)।

तस्माद् यो जायते सोऽपि तथा पुरुषाकृतिरेव स्यात्। सर्व-जातिषु जायमानानां जनकाकृति-नियम-दर्शनात्।

**सर्वप्राणिनामन्नविकारत्वे अविशेषे पुरुषग्रहणं शास्त्राधिकारित्वात्**

३६) सर्वेषामपि अन्न-रस-विकारत्वे ब्रह्म-वंश्यत्वे च अविशिष्टे कस्मात् पुरुषः एव गृह्यते**?** प्राधान्यात्।

किं पुनः प्राधान्यम्**?** कर्म-ज्ञानाधिकारः।

पुरुषः एव हि शक्तत्वात्, अर्थित्वात्, अपर्युदस्तत्वाच्च अर्थी विद्वान् समर्थः कर्मज्ञानयोः अधिक्रियते। “पुरुषे तु

एव आविस्तराम् आत्मा। स हि प्रज्ञानेन सम्पन्नतमः विज्ञातं वदति, विज्ञातं पश्यति, वेद श्वस्तनं,

वेद लोकालोकौ, मर्त्येन अमृतमीप्सति इत्येवं सम्पन्नः। अथ इतरेषां पशूनाम् अशना-पिपासे एवाभिविज्ञानम्”

(ऐ.आ. २.३.२) इत्यादि-श्रुत्यन्तर-दर्शनात्। स हि पुरुषः इह विद्ययाऽन्तरतमं ब्रह्म सङ्क्रामयितुम् इष्टः।

**शरीरस्य पक्षिकल्पनारूपोपदेशप्रकारस्य प्रयोजनम्**

३७) तस्य च बाह्याकार-विशेषेषु अनात्मसु आत्म-भाविता बुद्धिः, अनालम्ब्य विशेषं कञ्चित् सहसा अन्तरतम-प्रत्यगात्म-विषया निरालम्बना च कर्तुम् अशक्या इति, दृष्ट-शरीरात्म-सामान्य-कल्पनया शाखा-चन्द्र-निदर्शनवद् अन्तः प्रवेशयन्नाह - तस्येदमेव शिरः।

**शरीरस्य पक्षिकल्पनारूपोपपादनम्**

३८) तस्य अस्य पुरुषस्य अन्न-रसमयस्य इदमेव शिरः प्रसिद्धम्। प्राणमयादिषु अशिरसां शिरस्त्व-दर्शनाद् इहापि तत्प्रसङ्गो माभूदिति ‘इदमेव शिरः’ इति उच्यते। एवं पक्षादिषु योजना।

अयं दक्षिणो बाहुः, पूर्वाभिमुखस्य दक्षिणः पक्षः। अयं सव्यो बाहुः, उत्तरः पक्षः।

अयं मध्यमो देह-भागः आत्मा अङ्गानाम्। “मध्यं ह्येषाम् अङ्गानामात्मा” (ऐ.आ. २.३.५) इति श्रुतेः।

‘इदम्’ इति नाभेः अधस्ताद्यदङ्गं तत् पुच्छं प्रतिष्ठा। प्रतितिष्ठति अनया इति प्रतिष्ठा। पुच्छम् इव पुच्छम्।

अधो-लम्बन-सामान्यात्। यथा गोः पुच्छम्।

एतत्प्रकृत्य उत्तरेषां प्राणमयादीनां रूपकत्व-सिद्धिः, मूषा-निषिक्त-द्रुत-ताम्र-प्रतिमावत्। तदप्येष श्लोको भवति।

तत् तस्मिन्नेव अर्थे ब्राह्मणोक्ते अन्नमयात्म-प्रकाशकः एषः श्लोकः मन्त्रः भवति।। १ ।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-आनन्दवल्ली-भाष्ये प्रथमोऽनुवाकः।।

द्वितीयोऽनुवाकः

अन्नाद्वै प्रजाः प्रजायन्ते। याः काश्च पृथिवीꣳश्रिताः। अथो अन्नेनैव जीवन्ति। अथैनदपियन्त्यन्ततः। अन्नꣳहि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते। सर्वं वै तेऽन्नमाप्नुवन्ति। येऽन्नं ब्रह्मोपासते। अन्नꣳहि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते। अन्नाद्भूतानि जायन्ते। जातान्यन्नेन वर्धन्ते। अद्यतेऽत्ति च भूतानि। तस्मादन्नं तदुच्यत इति।

**अन्नमयात्मप्रकाशकः मन्त्रः**
**अन्नमयस्य समष्ट्यभेदवर्णनम्**

३९) अन्नाद् रसादि-भाव-परिणतात्। वै इति स्मरणार्थः। प्रजाः स्थावर-जङ्गमाः प्रजायन्ते।

याः काश्च अविशिष्टाः पृथिवीं श्रिताः पृथिवीम् आश्रिताः ताः सर्वाः अन्नादेव प्रजायन्ते।

अथो अपि जाताः अन्नेनैव जीवन्ति प्राणान् धारयन्ति। वर्धन्ते इत्यर्थः।

अथ अपि एनद् अन्नम् अपियन्ति अपिगच्छन्ति। अपि-शब्दः प्रतिशब्दार्थे। अन्नं प्रति प्रलीयन्ते इत्यर्थः।

अन्ततः अन्ते जीवन-लक्षणायाः वृद्धेः परिसमाप्तौ। कस्मात्? अन्नं हि यस्माद् भूतानां प्राणिनां ज्येष्ठं प्रथमजम्।

अन्नमयादीनां हि इतरेषां भूतानां कारणमन्नम्। अतः अन्न-प्रभवाः, अन्न-जीवनाः, अन्न-प्रलयाश्च सर्वाः प्रजाः।

यस्माच्च एवं तस्मात् सर्वौषधम् सर्व-प्राणिनां देह-दाह-प्रशमनम् अन्नम् उच्यते।

**अन्न-ब्रह्मविदः फलकथनम्**

४०) अन्न-ब्रह्मविदः फलमुच्यते। सर्वं वै ते समस्तम् अन्न-जातम् आप्नुवन्ति।

के? ये अन्नं ब्रह्म यथोक्तम् उपासते। कथम्? 'अन्नजः, अन्नात्मा, अन्न-प्रलयोऽहम्, तस्मादन्नं ब्रह्म' इति।

कुतः पुनः सर्वान्न-प्राप्ति-फलम् अन्नात्मोपासनम्? इत्युच्यते - अन्नं हि भूतानां ज्येष्ठम्।

भूतेभ्यः पूर्वं निष्पन्नत्वाद् ज्येष्ठं हि यस्मात्, तस्मात् सर्वौषधमुच्यते। तस्माद् उपपन्ना सर्वान्नात्मोपासकस्य

सर्वान्न-प्राप्तिः। 'अन्नाद्भूतानि जायन्ते। जातान्यन्नेन वर्धन्ते' इति उपसंहारार्थं पुनर्वचनम्।

**अन्नशब्दनिर्वचनम् अन्नमयकोशोपसंहारश्च**

४१) इदानीम् अन्न-शब्द-निर्वचनम् उच्यते। अद्यते भुज्यते चैव यद्भूतैः अन्नम्, अत्ति च भूतानि स्वयं यस्मात्, तस्माद् भूतैः भुज्यमानत्वाद् भूतभोक्तृत्वाच्च अन्नं तदुच्यते इति। इति-शब्दः प्रथम-कोश-परिसमाप्त्यर्थः।

**प्राणमयात्मा**

**उत्तरग्रन्थसम्बन्धः**

४२) अन्नमयादिभ्यः आनन्दमयान्तेभ्यः आत्मभ्यः अभ्यन्तरतमं ब्रह्म विद्यया प्रत्यग्-आत्मत्वेन दिदर्शयिषु शास्त्रम्, अविद्या-कृत-पञ्च-कोशापनयनेन अनेक-तुष-कोद्रव-वितुषी-करणेन इव तदन्तर्गत-तण्डुलान्, प्रस्तौति 'तस्माद्वा एतस्माद् अन्न-रसमयात्' इत्यादि।

**तस्माद्वा एतस्मादन्नरसमयात्। अन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव।**
**तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिणः पक्षः।**
**अपान उत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ २.२॥**

**प्राणमयेन अन्नमयस्य पूर्णत्वात् प्राणमयस्यापि पक्षिरूपत्वम्**

४३) तस्माद् वै एतस्माद् यथोक्ताद् अन्न-रसमयात् पिण्डाद् अन्यः व्यतिरिक्तः अन्तरः अभ्यन्तरः आत्मा पिण्डवदेव मिथ्या-परिकल्पितः आत्मत्वेन प्राणमयः। प्राणः वायुः, तन्मयः तत्प्रायः।

तेन प्राणमयेन एषः अन्न-रसमयः आत्मा पूर्णः। वायुना इव दृतिः। स वै एषः प्राणमयः आत्मा पुरुषविधः एव पुरुषाकारः एव, शिरः-पक्षादिभिः। किं स्वतः एव? न इत्याह। प्रसिद्धं तावद् अन्न-रसमयस्य आत्मनः पुरुषविधत्वम्। तस्य अन्न-रसमयस्य पुरुषविधताम् पुरुषाकारताम् अनु, अयं प्राणमयः पुरुषविधः मूषा-निषिक्त-प्रतिमावत्। न स्वतः एव। एवं पूर्वस्य पूर्वस्य पुरुषविधताम् अनु उत्तरोत्तरः पुरुषविधो भवति। पुर्वः पूर्वः च उत्तरोत्तरेण पूर्णः।

**प्राणमयस्य पक्षिरूपत्वोपपादनम्**

४४) कथं पुनः पुरुषविधता अस्य? इत्युच्यते - तस्य प्राणमयस्य प्राणः एव शिरः। प्राणमयस्य वायु-विकारस्य प्राणः मुख-नासिका-निःसरणः वृत्ति-विशेषः शिरः एव इति परिकल्प्यते, वचनात्। सर्वत्र वचनादेव पक्षादि-कल्पना। व्यानः व्यान-वृत्तिः दक्षिणः पक्षः। अपानः उत्तरः पक्षः। आकाशः आत्मा।

यः आकाशस्थो वृत्ति-विशेषः समानाख्यः स आत्मा इव आत्मा, प्राण-वृत्त्यधिकारात्।

मध्यस्थत्वाद् इतराः पर्यन्ताः वृत्तीः अपेक्ष्य आत्मा।

“मध्यं ह्येषामङ्गानामात्मा” (ऐ.आ २.३.५) इति श्रुति-प्रसिद्धं मध्यस्थस्य आत्मत्वम्।

पृथिवी पुच्छं प्रतिष्ठा। ‘पृथिवी’ इति पृथिवी-देवता। आध्यात्मिकस्य प्राणस्य धारयित्री, स्थिति-हेतुत्वात्।

“सैषा पुरुषस्य अपानमवष्टभ्य” (प्र. ३.८) इति श्रुत्यन्तरात्। अन्यथा उदान-वृत्त्या ऊर्ध्वगमनं, गुरुत्वाच्च पतनं

वा स्याच्छरीरस्य। तस्मात् पृथिवी-देवता पुच्छं प्रतिष्ठा प्राणमयस्य आत्मनः।

तत् तस्मिन्नेव अर्थे प्राणमयात्मविषये एषः श्लोको भवति।। २।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-आनन्दवल्ली-भाष्ये द्वितीयोऽनुवाकः।।

## तृतीयोऽनुवाकः

प्राणं देवा अनुप्राणन्ति। मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते।
सर्वमेव त आयुर्यन्ति। ये प्राणं ब्रह्मोपासते। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यत इति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मात्प्राणमयात्। अन्योऽन्तर आत्मा मनोमयः।
तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः।
ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति॥ २.३॥

**प्राणमयात्मप्रकाशकः मन्त्रः प्राणशब्दार्थकथनम्**

४५) प्राणं देवाः अनु प्राणन्ति। देवाः अग्न्यादयः प्राणं वाय्वात्मानं प्राणन-शक्तिमन्तम् अनु तदात्मभूताः सन्तः

प्राणन्ति प्राणन-कर्म कुर्वन्ति। प्राणन-क्रियया क्रियावन्तो भवन्ति।

अध्यात्माधिकाराद् देवाः इन्द्रियाणि, प्राणम् अनु प्राणन्ति मुख्य-प्राणम् अनु चेष्टन्ते इति वा।

तथा मनुष्याः पशवश्च ये, ते प्राणन-कर्मणैव चेष्टावन्तो भवन्ति।

**प्राणमयादीनामाभ्यन्तरकथनस्य परमतात्पर्यम्**

४६) अतश्च न अन्नमयेन एव परिच्छिन्नेन आत्मना आत्मवन्तः प्राणिनः।

किं तर्हि? तदन्तर्गतेन प्राणमयेनापि साधारणेनैव सर्व-पिण्ड-व्यापिनाऽऽत्मवन्तो मनुष्यादयः।

एवं मनोमयादिभिः पूर्व-पूर्व-व्यापिभिः, उत्तरोत्तरैः सूक्ष्मैः, आनन्दमयान्तैः आकाशादि-भूतारब्धैः, अविद्या-कृतैः आत्मवन्तः सर्वे प्राणिनः। यथा अनेक-तुष-कोद्रवः तथा स्वाभाविकेनापि आकाशादि-कारणेन, नित्येन, अविकृतेन, सर्वगतेन, सत्य-ज्ञानानन्त-लक्षणेन, पञ्चकोशातिगेन सर्वात्मना आत्मवन्तः।

स हि परमार्थतः आत्मा सर्वेषाम् इत्येतदपि अर्थाद् उक्तं भवति।

**प्राणोपासनस्य फलम्**

४७) 'प्राणं देवाः अनुप्राणन्ति' इत्युक्तम्।

तत् कस्मात्? इत्याह - प्राणो हि यस्माद् भूतानां प्राणिनाम् आयुः जीवनम्।

"यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः" (कौ. ३.२) इति श्रुत्यन्तरात्।

तस्मात् सर्वायुषं सर्वेषामायुः सर्वायुः। सर्वायुरेव सर्वायुषम् इति उच्यते। प्राणापगमे मरण-प्रसिद्धेः।

प्रसिद्धं हि लोके सर्वायुष्ट्वं प्राणस्य। अतः अस्माद् बाह्याद् असाधारणाद् अन्नमयाद् आत्मनोऽपक्रम्य अन्तः

साधारणं प्राणमयमात्मानं ब्रह्म उपासते ये 'अहमस्मि प्राणः सर्वभूतानामात्मा आयुः जीवन-हेतुत्वात्' इति, ते

सर्वमेव आयुः अस्मिन् लोके यन्ति। न अपमृत्युना म्रियन्ते प्राक् प्राप्ताद् आयुषः इत्यर्थः।

शतं वर्षाणि इति तु युक्तं "सर्वमायुः एति" (छा. २.११.२, २.२१.२०) इति श्रुति-प्रसिद्धेः।

किं कारणम्? प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते इति।

यो यद्गुणकं ब्रह्म उपास्ते स तद्गुण-भाग् भवतीति विद्या-फल-प्राप्तौ हेत्वर्थं पुनर्वचनं 'प्राणो हि' इत्यादि।

**प्राणमयः अन्नमयस्य आत्मा**

४८) तस्य पूर्वस्य अन्नमयस्य एषः एव शरीरे अन्नमये भवः शारीरः आत्मा। कः? यः एषः प्राणमयः।

**मनोमयात्मप्रदर्शनम्**

४९) ‘तस्माद्वा एतस्मात्’ इत्यादि उक्तार्थमन्यत्। अन्योऽन्तरः आत्मा मनोमयः।

मन इति सङ्कल्पाद्यात्मकम् अन्तः-करणम्। तन्मयः मनोमयः। यथा अन्नमयः।

सोऽयं प्राणमयस्य आभ्यन्तरः आत्मा।

**मनोमयस्य पक्षिरूपत्वोपपादनम्**
**मन्त्राणां मनोवृत्तित्वनिरूपणम्**

५०) तस्य यजुरेव शिरः। ‘यजुः’ इति अनियताक्षर-पादावसानो मन्त्र-विशेषः। तज्जातीय-वचनो यजुः-शब्दः।

तस्य शिरस्त्वम्, प्राधान्यात्। प्राधान्यं च यागादौ सन्निपत्योपकारात्। यजुषा हि हविर्दीयते स्वाहाकारादिना।

वाचनिकी वा शिर-आदि-कल्पना सर्वत्र।

मनसो हि स्थान-प्रयत्न-नाद-स्वर-वर्ण-पद-वाक्य-विषया तत्सङ्कल्पात्मिका तद्भाविता वृत्तिः श्रोत्रादि-करण-

द्वारा यजुः-सङ्केत-विशिष्टा यजुरित्युच्यते। एवम् ऋक्। एवं साम च।

**मन्त्राणां मनोवृत्तित्वे फलम्**

५१) एवं च मनो-वृत्तित्वे मन्त्राणाम्, वृत्तिरेव आवर्त्यते इति मानसो जपः उपपद्यते।

अन्यथा अविषयत्वाद् मन्त्रो न आवर्त्तयितुं शक्यः घटादिवद् इति मानसो जपो नोपपद्यते।

मन्त्रावृत्तिश्च चोद्यते बहुशः कर्मसु।

**आक्षेपः**

अक्षर-विषय-स्मृत्यावृत्त्या मन्त्रावृत्तिः स्याद् इति चेत्।

**समाधानम्**

न। मुख्यार्थासम्भवात्। "त्रिः प्रथमामन्वाह, त्रिरुत्तमाम्" (तै.सं. २.५.७.१ ऐ.ब्रा. १.३.२) इति ऋगावृत्तिः

श्रूयते। तत्र ऋचोऽविषयत्वे तद्विषय-स्मृत्यावृत्तौ च क्रियमाणायां 'त्रिः प्रथमामन्वाह' इति ऋगावृत्तिः मुख्योऽर्थः

चोदितः परित्यक्तः स्यात्। तस्माद् मनोवृत्त्युपाधि-परिच्छिन्नम्, मनोवृत्ति-निष्ठम् आत्म-चैतन्यम् अनादि-निधनं

यजुः-शब्द-वाच्यम् आत्म-विज्ञानम् - 'मन्त्राः' इति।

**चिदात्मत्वाद् मन्त्राणां नित्यत्वम्**

५२) एवं च नित्यत्वोपपत्तिः वेदानाम्। अन्यथा विषयत्वे रूपादिवद् अनित्यत्वं च स्यात्। नैतद्युक्तम्।

“सर्वे वेदाः यत्रैकं भवन्ति...स मानसीनः आत्मा जनानाम्” (तै.आ. ३.११.१) इति श्रुतिः नित्यात्मना एकत्वं

ब्रुवती, ऋगादीनां नित्यत्वे समञ्जसा स्यात्। “ऋचो अक्षरे परमे व्योमन्यस्मिन् देवाः अधि विश्वे निषेदुः”

(ऋ.सं. १.१६४.३९, श्वे. ४.८) इति च मन्त्र-वर्णः।

आदेशः अत्र ब्राह्मणम्। अतिदेष्टव्य-विशेषान् अतिदिशति इति।

अथर्वणा अङ्गिरसा च दृष्टाः मन्त्राः ब्राह्मणं च शान्तिक-पौष्टिकादि-प्रतिष्ठा-हेतु-कर्म-प्रधानत्वात् पुच्छं प्रतिष्ठा।

**मनोमयात्मप्रकाशकश्लोकः**

५३) तदप्येष श्लोको भवति मनोमयात्म-प्रकाशकः पूर्ववत्।। ३।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-आनन्दवल्ली-भाष्ये तृतीयोऽनुवाकः।।

चतुर्थोऽनुवाकः

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः।
तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः।
ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ २.४॥

**मनोमयः प्राणमयस्य आत्मा**

५४) "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इत्यादि। तस्य पूर्वस्य प्राणमयस्य एष एव आत्मा शारीरः।

शरीरे प्राणमये भवः शारीरः। कः? यः एष मनोमयः।

**विज्ञानमयात्मा**
**विज्ञानमयात्मप्रदर्शनम्**

५५) तस्माद्वा एतस्माद् इत्यादि पूर्ववत्। अन्योऽन्तर आत्मा विज्ञानमयः। मनोमयस्य आभ्यन्तरः विज्ञानमयः।

मनोमयो वेदात्मा उक्तः। वेदार्थ-विषया बुद्धिः निश्चयात्मिका विज्ञानम्।

तच्च अध्यवसाय-लक्षणम् अन्तः-करणस्य धर्मः, तन्मयः निश्चय-विज्ञानैः प्रमाण-स्वरूपैः निर्वर्त्तितः

आत्मा विज्ञानमयः। प्रमाण-विज्ञान-पूर्वको हि यज्ञादिः तायते। यज्ञादि-हेतुत्वं च वक्ष्यति श्लोकेन।

**विज्ञानमयस्य पक्षिरूपत्वोपपादनम्**

५६) निश्चय-विज्ञानवतो हि कर्त्तव्येष्वर्थेषु पूर्वं श्रद्धा उत्पद्यते। सा सर्व-कर्त्तव्यानां प्राथम्यात् शिरः इव शिरः। ऋत-सत्ये यथा-व्याख्याते एव। योगः युक्तिः, समाधानम् आत्मा इव आत्मा। आत्मवतो हि युक्तस्य समाधानवतः अङ्गानि इव श्रद्धादीनि यथार्थ-प्रतिपत्ति-क्षमाणि भवन्ति। तस्मात् समाधानं योगः आत्मा विज्ञानमयस्य। महः पुच्छं प्रतिष्ठा। 'महः' इति महत्तत्वं प्रथमजम्। "महद्यक्षं प्रथमजम्" (बृ. ५.४.१) इति श्रुत्यन्तरात्। पुच्छं प्रतिष्ठा कारणत्वात्। कारणं हि कार्याणां प्रतिष्ठा। यथा वृक्ष-वीरुधां पृथिवी। सर्व-बुद्धि-विज्ञानानां च महत्तत्वं कारणम्। तेन तद् विज्ञानमयस्य आत्मनः प्रतिष्ठा।

**विज्ञानमयात्मप्रकाशकश्लोकावतरणिका**

५७) तदप्येष श्लोको भवति पूर्ववत्। यथा अन्नमयादीनां ब्राह्मणोक्तानां प्रकाशकाः श्लोकाः एवं विज्ञानमयस्यापि ।। ४।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-आनन्दवल्ली-भाष्ये चतुर्थोऽनुवाकः।।

पञ्चमोऽनुवाकः

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवास्सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान् कामान् समश्नुत इति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तर पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥

२.५॥

**विज्ञानमयात्मप्रकाशकश्लोकव्याख्यानम्**

५८) विज्ञानं यज्ञं तनुते। विज्ञानवान् हि यज्ञं तनोति श्रद्धादि-पूर्वकम्। अतो विज्ञानस्य कर्तृत्वं 'तनुते' इति।

कर्माणि च तनुते। यस्माद् विज्ञान-कर्तृकं सर्वं, तस्माद् युक्तं विज्ञानमयः आत्मा ब्रह्म इति। किञ्च विज्ञानं ब्रह्म।

सर्वे देवाः इन्द्रादयः, ज्येष्ठं – प्रथमजत्वात्, सर्व-प्रवृत्तीनां वा तत्पूर्वकत्वात् प्रथमजं विज्ञानम् – ब्रह्म उपासते

ध्यायन्ति। तस्मिन् विज्ञानमये ब्रह्मणि अभिमानं कृत्वा उपासते इत्यर्थः।

तस्मात्ते महतः ब्रह्मणः उपासनात् ज्ञानैश्वर्यवन्तः भवन्ति।

**विज्ञानब्रह्मोपासनस्य द्विविधं फलम्**
**पापक्षयः सर्वकामावाप्तिः च**

५९) तच्च विज्ञानं ब्रह्म चेद् यदि वेद विजानाति। न केवलं वेद एव, तस्माद् ब्रह्मणः चेद् न प्रमाद्यति।

बाह्येषु एव अनात्मसु आत्म-भावितत्वात् प्राप्तं विज्ञानमये ब्रह्मणि आत्म-भावनायाः प्रमदनम्।

अतः तन्निवृत्त्यर्थमुच्यते 'तस्मात् चेद् न प्रमाद्यति' इति। अन्नमयादिषु आत्म-भावं हित्वा केवले विज्ञानमये

ब्रह्मणि आत्मत्वं भावयन्नास्ते चेत् इत्यर्थः। ततः किं स्यात्? इत्युच्यते - शरीरे पाप्मनो हित्वा।

शरीराभिमान-निमित्ताः हि सर्वे पाप्मानः। तेषां च विज्ञानमये ब्रह्मणि आत्माभिमानात्, निमित्तापाये

हानमुपपद्यते। छत्रापाये इव च्छायापायः।

तस्मात् शरीराभिमान-निमित्तान् सर्वान् पाप्मनः शरीर-प्रभवान् शरीरे एव हित्वा विज्ञानमय-ब्रह्म-स्वरूप-आपन्नः

तत्स्थान् सर्वान् कामान् विज्ञानमयेनैव आत्मना समश्नुते सम्यग् भु□इत्यर्थः।

**विज्ञानमयः मनोमयस्य आत्मा**

६०) तस्य पूर्वस्य मनोमयस्य आत्मा एषः एव शरीरे मनोमये भवः शारीरः। कः? यः एषः विज्ञानमयः।

**आनन्दमयात्मा**
**आनन्दमयेति ब्रह्म नोच्यते किन्तु कार्यात्मैव**
**प्रथमो हेतुः - कार्याधिकारपतितत्वात्**

६१) तस्माद्वा एतस्माद् इत्युक्तार्थम्। 'आनन्दमयः' इति कार्यात्म-प्रतीतिः, अधिकारात्। मयट्-शब्दाच्च।

अन्नादिमया हि कार्यात्मानः भौतिका इह अधिकृताः। तदधिकार-पतितश्च अयम् 'आनन्दमयः'।

मयट् चात्र विकारार्थे दृष्टः। यथा 'अन्नमयः' इत्यत्र। तस्मात् कार्यात्मा 'आनन्दमयः' प्रत्येतव्यः।

**द्वितीयो हेतुः - सङ्क्रमणश्रुतेः**

६२) सङ्क्रमणाच्च। "आनन्दमयम् आत्मानम् उपसङ्क्रामति" (तै. २.८) इति वक्ष्यति।

कार्यात्मनां च सङ्क्रमणम् अनात्मनां दृष्टम्। सङ्क्रमण-कर्मत्वेन च 'आनन्दमयः आत्मा' श्रूयते।

यथा "अन्नमयमात्मानम् उपसङ्क्रामति" (तै. २.८) इति। न च आत्मनः एव उपसङ्क्रमणम्, अधिकार-

विरोधात्। असम्भवाच्च। न हि आत्मना एव आत्मनः उपसङ्क्रमणं सम्भवति, स्वात्मनि भेदाभावात्।

आत्मभूतं च ब्रह्म सङ्क्रमितुः।

**तृतीयो हेतुः - अवयवकल्पनाभावात्**

६३) शिर-आदि-कल्पनानुपपत्तेश्च। न हि यथोक्त-लक्षणे आकाशादि-कारणे अकार्य-पतिते शिर-आद्यवयव-रूप-कल्पना उपपद्यते। “अदृश्येऽनात्म्येऽनिरुक्ते अनिलयने” (तै. २.७) “अस्थूलमनणु” (बृ. ३.८.८) “नेति नेत्यात्मा” (बृ. ३.९.२६) इत्यादि-विशेषापोह-श्रुतिभ्यश्च।

**चतुर्थो हेतुः - मन्त्रोदाहरणानुपपत्तेः**

६४) मन्त्रोदाहरणानुपपत्तेः च। न हि प्रिय-शिर-आद्यवयव-विशिष्टे प्रत्यक्षतः अनुभूयमाने आनन्दमये आत्मनि ब्रह्मणि ‘नास्ति ब्रह्म’ इत्याशङ्काभावात् “असन्नेव स भवति असद् ब्रह्मेति वेद चेत्” (तै. २.६) इति मन्त्रोदाहरणमुपपद्यते।

**पञ्चमो हेतुः - ब्रह्मणः पुच्छत्वानुपपत्तेः**

६५) ‘ब्रह्म पुच्छं प्रतिष्ठा’ इत्यपि च अनुपपन्नं पृथग्ब्रह्मणः प्रतिष्ठात्वेन ग्रहणम्। तस्मात् कार्यपतितः एव आनन्दमयः, न परः एव आत्मा।

**आनन्दमयशब्दार्थप्रतिपादनम्**

६६) 'आनन्दः' इति विद्या-कर्मणोः फलम्। तद्विकारः आनन्दमयः। स च विज्ञानमयाद् अन्तरः।

यज्ञादि-हेतोः विज्ञानमयाद् अस्य आन्तरत्व-श्रुतेः। ज्ञान-कर्मणोः हि फलं भोक्त्रर्थत्वाद् अन्तरतमं स्यात्।

अन्तरतमश्च आनन्दमयः आत्मा पूर्वेभ्यः। विद्या-कर्मणोः प्रियाद्यर्थत्वाच्च। प्रियादि-प्रयुक्ते हि विद्या-कर्मणी।

तस्मात् प्रियादीनां फल-रूपाणाम् आत्म-सन्निकर्षाद् विज्ञानमयाद् अस्य आभ्यन्तरत्वम् उपपद्यते।

प्रियादि-वासना-निर्वर्त्तितः ह्यात्मा आनन्दमयः विज्ञान-मयाश्रितः स्वप्ने उपलभ्यते।

**आनन्दमयस्य पक्षिरूपत्वोपपादनम्**

६७) तस्य आनन्दमयस्य आत्मनः इष्ट-पुत्रादि-दर्शनजं प्रियं शिर इव शिरः, प्राधान्यात्।

मोदः इति प्रिय-लाभ-निमित्तः हर्षः। स एव च प्रकृष्टः हर्षः प्रमोदः।

'आनन्दः' इति सुख-सामान्यम्, आत्मा प्रियादीनां सुखावयवानाम्। तेषु अनुस्यूतत्वात्।

‘आनन्दः’ इति परं ब्रह्म। तद्धि शुभ-कर्मणा प्रत्युपस्थाप्यमाने पुत्र-मित्रादि-विषय-विशेषोपाधौ अन्तः-करण-

वृत्ति-विशेषे तमसा अप्रच्छाद्यमाने प्रसन्ने अभिव्यज्यते। तद् विषय-सुखम् इति प्रसिद्धं लोके।

तद्वृत्ति-विशेष-प्रत्युपस्थापकस्य कर्मणः अनवस्थितत्वात् सुखस्य क्षणिकत्वम्।

तद्यदा अन्तःकरणं तपसा तमोघ्नेन, विद्यया, ब्रह्मचर्येण, श्रद्धया च निर्मलत्वमापद्यते यावद्यावत्, तावत्तावद्

विविक्ते प्रसन्नेऽन्तःकरणे आनन्द-विशेषः उत्कृष्यते विपुलीभवति।

वक्ष्यति च “रसो वै सः रसँ ह्येवायं लब्ध्वानन्दी भवति” (तै. २.७), “एष ह्येवानन्दयाति” (तै. २.७) इति।

“एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति” (बृ. ४.३.३२) इति च श्रुत्यन्तरात्।

एवं च कामोपशमोत्कर्षापेक्षया शत-गुणोत्तरोत्तरोत्कर्षः आनन्दस्य वक्ष्यते।

**आनन्दमयस्य पुच्छं परं सद्रूपं ब्रह्म एव**

६८) एवं च उत्कृष्यमाणस्य आनन्दमयस्य आत्मनः परमार्थ-ब्रह्म-विज्ञानापेक्षया ब्रह्म परमेव – यत् प्रकृतं सत्य-ज्ञानानन्त-लक्षणम्, यस्य च प्रतिपत्त्यर्थं पञ्च अन्नमयादिकोशाः उपन्यस्ताः, यच्च तेभ्यः आभ्यन्तरम्, येन च ते सर्वे आत्मवन्तः, तत् – ब्रह्म पुच्छं प्रतिष्ठा।

तदेव च सर्वस्य अविद्या-परिकल्पितस्य द्वैतस्य अवसान-भूतम् अद्वैतं ब्रह्म प्रतिष्ठा।

आनन्दमयस्य एकत्वावसानत्वाद् अस्ति तदेकम् अविद्या-कल्पितस्य द्वैतस्य अवसान-भूतम् अद्वैतं ब्रह्म प्रतिष्ठा पुच्छम्।

**ब्रह्मास्तित्वप्रकाशकश्लोकावतरणिका**

६९) तद् एतस्मिन् अपि अर्थे एष श्लोकः भवति।। ५ ।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-आनन्दवल्ली-भाष्ये पञ्चमोऽनुवाकः।।

षष्ठोऽनुवाकः

**असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती३। आहो विद्वानमुं लोकं प्रेत्य। कश्चित्समश्नुता३ उ। सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदꣳसर्वमसृजत। यदिदं किञ्च। तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्। यदिदं किञ्च। तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति॥ २.६॥**

**ब्रह्मास्तित्वप्रकाशकश्लोकार्थः**
**ब्रह्म नास्ति इति न प्रतिपत्तव्यम्**

७०) असन्नेव असत्समः एव - यथा असन् अपुरुषार्थ-सम्बन्धी एवम् - सः भवति अपुरुषार्थ-सम्बन्धी।

कोऽसौ? यः असद् अविद्यमानं ब्रह्म इति वेद विजानाति चेत् यदि। तद्विपर्ययेण यत्सर्व-विकल्पास्पदं सर्व-

प्रवृत्ति-बीजं सर्व-विशेष-प्रत्यस्तमितम् अपि अस्ति तद् ब्रह्मेति वेद चेत्।

**ब्रह्मणः नास्तित्वशङ्कायां निमित्तम्**

७१) कुतः पुनः आशङ्का तन्नास्तित्वे? व्यवहारातीतत्वं ब्रह्मणः इति ब्रूमः।

व्यवहार-विषये हि वाचारम्भणमात्रे अस्तित्व-भाविता बुद्धिः। तद्विपरीते व्यवहारातीते नास्तित्वमपि प्रतिपद्यते।

यथा घटादिः व्यवहार-विषयतया उपपन्नः सन्, तद्विपरीतः असन्निति प्रसिद्धम्। एवं तत्सामान्याद् इहापि स्याद्

ब्रह्मणो नास्तित्वं प्रति आशङ्का। तस्मादुच्यते ‘अस्ति ब्रह्मेति चेद्वेद’ इति।

**ब्रह्मणः अस्तित्वप्रतिपत्तौ परमार्थप्राप्तिः**

७२) किं पुनः स्यात् तदस्तीति विजानतः? तदाह - सन्तं विद्यमानं ब्रह्म-स्वरूपेण परमार्थ-सदात्मापन्नम् एनम्

एवंविदं विदुः ब्रह्म-विदः। ततः तस्माद् अस्तित्व-वेदनात् सः अन्येषां ब्रह्मवद् विज्ञेयो भवति इत्यर्थः।

**सच्छब्दस्य व्याख्यानान्तरम्**

७३) अथवा यो ‘नास्ति ब्रह्म’ इति मन्यते सः सर्वस्य एव सन्मार्गस्य वर्णाश्रमादि-व्यवस्था-लक्षणस्य

अश्रद्दधानतया नास्तित्वं प्रतिपद्यते। ब्रह्म-प्रतिपत्त्यर्थत्वात् तस्य। अतः नास्तिकः सः ‘असन्’ असाधुरुच्यते

लोके।

तद्विपरीतः सन्, यः अस्ति ब्रह्मेति चेद्वेद, सः तद्-ब्रह्म-प्रतिपत्ति-हेतुं सन्मार्गं वर्णाश्रमादि-व्यवस्था-लक्षणं

श्रद्दधानतया यथावत् प्रतिपद्यते यस्मात्, ततः तस्मात् सन्तं साधु-मार्गस्थं एनं विदुः साधवः।

तस्माद् अस्तीत्येव ब्रह्म प्रतिपत्तव्यमिति वाक्यार्थः।

**आनन्दमयकोशोपसंहारः**

७४) तस्य पूर्वस्य विज्ञानमयस्य एष एव शरीरे विज्ञानमये भवः शारीरः आत्मा।

कोऽसौ? यः एषः आनन्दमयः। तं प्रति नास्त्याशङ्का नास्तित्वे। अपोढ-सर्व-विशेषत्वात्तु ब्रह्मणः नास्तित्वं

प्रत्याशङ्का युक्ता, सर्व-सामान्याच्च ब्रह्मणः।

**विद्वदविदुषोः ब्रह्मप्राप्तिविषये शिष्यस्य अनुप्रश्नाः**

७५) यस्मादेवं अतः तस्माद् अथ अनन्तरं श्रोतुः शिष्यस्य अनुप्रश्नाः। आचार्योक्तिमनु एते प्रश्नाः अनुप्रश्नाः।

सामान्यं हि ब्रह्म आकाशादि-कारणत्वाद् विदुषः अविदुषश्च। तस्माद् अविदुषः अपि ब्रह्म-प्राप्तिः आशङ्क्यते।

१) उत अपि अविद्वान् अमुं लोकं परमात्मानं इतः प्रेत्य कश्चन - चन-शब्दः अप्यर्थे - अविद्वानपि गच्छति प्राप्नोति? २) किं वा न गच्छति? इति द्वितीयोऽपि प्रश्नः द्रष्टव्यः। 'अनुप्रश्नाः' इति बहुवचनात्। विद्वांसं प्रति अन्यौ प्रश्नौ। यदि अविद्वान् सामान्यं कारणमपि ब्रह्म न गच्छति, ततो विदुषः अपि ब्रह्मागमनमाशङ्क्यते। अतः तं प्रति प्रश्नः 'आहो विद्वान्' इति।

३) विद्वान् ब्रह्मविदपि कश्चिद् इतः प्रेत्य अमुं लोकं समश्नुते प्राप्नोति। 'समश्नुते उ' इत्येवं स्थिते, अयादेशे य-लोपे च कृते, अकारस्य प्लुतिः 'समश्नुता३ उ' इति। उकारं च वक्ष्यमाणमधस्ताद् अपकृष्य, तकारं च पूर्वस्माद् उत-शब्दाद् व्यासज्य, 'आहो' इत्येतस्मात् पूर्वम् उत-शब्दं संयोज्य पृच्छ्यते 'उत आहो विद्वान्' इति। विद्वान् समश्नुते अमुं लोकम्? ४) किं वा यथा अविद्वान्, एवं विद्वानपि न समश्नुते? इत्यपरः प्रश्नः।

द्वावेव वा प्रश्नौ विद्वदविद्वद्विषयौ। बहुवचनं तु सामर्थ्य-प्राप्त-प्रश्नान्तरापेक्षया घटते।

**प्रश्न-मीमांसोपसंहारः**

७६) 'असद् ब्रह्मेति वेद चेत्', 'अस्ति ब्रह्मेति चेद्वेद' इति श्रवणात् अस्ति नास्तीति संशयः।

ततः अर्थ-प्राप्तः १) 'किमस्ति, नास्ति?' इति प्रथमोऽनुप्रश्नः। २) ब्रह्मणः अपक्षपातित्वात् 'अविद्वान् गच्छति, न गच्छति?' इति द्वितीयः। ३) ब्रह्मणः समत्वेऽपि अविदुषः इव विदुषः अपि अगमनमाशङ्क्यते। 'किं विद्वान् समश्नुते, न समश्नुते?' इति तृतीयोऽनुप्रश्नः।

**उत्तरग्रन्थप्रयोजनम् - उपपत्तिपर्यालोचनम्**

७७) एतेषां प्रतिवचनार्थम् उत्तर-ग्रन्थः आरभ्यते। तत्र अस्तित्वमेव तावदुच्यते।

यच्चोक्तं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति तत्र कथं सत्यत्वम् इत्येतद्वक्तव्यम् इति इदमुच्यते।

सत्त्वोक्त्या एव सत्यत्वमुच्यते। उक्तं हि "सदेव...सत्यम्" (छा. अध्याय ६) इति।

तस्मात् सत्त्वोक्त्या एव सत्यत्वमुच्यते। कथमेवम् अर्थता अवगम्यते अस्य ग्रन्थस्य**?** शब्दानुगमात्।

अनेनैव हि अर्थेन अन्वितानि उत्तराणि वाक्यानि। “तत्सत्यमित्याचक्षते” (तै.२.६), “यदेष आकाश आनन्दो

न स्यात्” (तै.२.७) इत्यादीनि।

**आचार्यप्रतिवचनम् : ब्रह्मसद्भावः**
**पूर्वपक्षः**
७८) तत्र असदेव ब्रह्म इत्याशङ्क्यते। कस्मात्**?** यदस्ति तद्विशेषतो गृह्यते, यथा घटादि।

यन्नास्ति तन्नोपलभ्यते। यथा शश-विषाणादि। तथा नोपलभ्यते ब्रह्म। तस्माद् विशेषतः अग्रहणाद् नास्तीति।

**सिद्धान्तः**
**ब्रह्मसद्भावे (१) प्रथमो हेतुः - आकाशादिकारणत्वात्**
७९) तन्न। आकाशादि-कारणत्वाद् ब्रह्मणः। न नास्ति ब्रह्म। कस्मात्**?** आकाशादि हि सर्वं कार्यं ब्रह्मणो जातं

गृह्यते। यस्माच्च जायते किञ्चित् तदस्तीति दृष्टं लोके, यथा घटाङ्कुरादि-कारणं मृ□ादि।

तस्माद् आकाशादि-कारणत्वाद् अस्ति ब्रह्म। न च असतो जातं किञ्चिद् गृह्यते लोके कार्यम्।

असतः चेद् नाम-रूपादि कार्यम्, निरात्मकत्वाद् नोपलभ्येत। उपलभ्यते तु। तस्मादस्ति ब्रह्म।

असतः चेत् कार्यं गृह्यमाणमपि असदन्वितमेव तत् स्यात्। न च एवम्। तस्मादस्ति ब्रह्म।

तत्र “कथमसतः सज्जायेत” (छा.६.२.२) इति श्रुत्यन्तरमसतः सज्जन्मासम्भवम् अन्वाचष्टे न्यायतः।

तस्मात् सदेव ब्रह्म इति युक्तम्।

**ब्रह्मणः चेतनत्वोपपत्तिः कामयितृत्वात्**

**आक्षेपः**

८०) तद्यदि मृ□ादिवत् कारणं स्यात्, अचेतनं तर्हि।

**समाधानम्**

न। कामयितृत्वात्। न हि कामयितृ अचेतनमस्ति लोके। सर्वज्ञं हि ब्रह्म इत्यवोचाम।

अतः कामयितृत्वोपपत्तिः।

**कामयितृत्वेऽपि आप्तकामत्वम्**

**आक्षेपः**

८१) कामयितृत्वाद् अस्मदादिवद् अनाप्तकाममिति चेत्।

**समाधानम्**

न। १) स्वातन्त्र्यात्। यथा अन्यान् परवशीकृत्य कामादि-दोषाः प्रवर्त्तयन्ति न तथा ब्रह्मणः प्रवर्त्तकाः कामाः। कथं तर्हि? सत्य-ज्ञान-लक्षणाः स्वात्मभूतत्वाद् विशुद्धाः। न तैः ब्रह्म प्रवर्त्यते। तेषां तु तत्प्रवर्त्तकं ब्रह्म प्राणि-कर्मापेक्षया। तस्मात्स्वातन्त्र्यं कामेषु ब्रह्मणः। अतो न अनाप्त-कामं ब्रह्म। २) साधनान्तरानपेक्षत्वाच्च। किञ्च यथा अन्येषाम् अनात्म-भूताः धर्मादि-निमित्तापेक्षाः कामाः स्वात्म-व्यतिरिक्त-कार्य-करण-साधनान्तरापेक्षाः च, न तथा ब्रह्मणः निमित्ताद्यपेक्षत्वम्। किं तर्हि? स्वात्मनः अनन्याः। तदेतदाह - सोऽकामयत।

**ब्रह्मणः बहुभवनप्रकारः**

८२) सः आत्मा, यस्माद् आकाशः सम्भूतः, अकामयत कामितवान्। कथम्? बहु स्याम्। बहु प्रभूतं स्यां भवेयम्। कथं एकस्य अर्थान्तराननुप्रवेशे बहुत्वं स्यात्? इत्युच्यते - प्रजायेय उत्पद्येय। न हि पुत्रोत्पत्त्येव अर्थान्तर-विषयं बहु-भवनम्। कथं तर्हि? आत्मस्थ-अनभिव्यक्त-नाम-रूपाभिव्यक्त्या।

यदा आत्मस्थे अनभिव्यक्ते नामरूपे व्याक्रियेते, तदा नामरूपे आत्मस्वरूपापरित्यागेनैव ब्रह्मणः अप्रविभक्त-

देश-काले सर्वावस्थासु व्याक्रियेते, तदा तन्नाम-रूप-व्याकरणं ब्रह्मणो बहु-भवनम्।

न अन्यथा निरवयवस्य ब्रह्मणः बहुत्वापत्तिः उपपद्यते, अल्पत्वं वा।

यथा आकाशस्य अल्पत्वं बहुत्वं च वस्त्वन्तरकृतम् एव। अतः तद्वारेण एव आत्मा बहु भवति।

**मायामात्रमिदं द्वैतम्**

८३) न हि आत्मनः अन्यद् अनात्म-भूतम्, तत्प्रविभक्त-देश-कालम्, सूक्ष्मम्, व्यवहितम्, विप्रकृष्टम्, भूतम्,

भवत्, भविष्यद्वा वस्तु विद्यते। अतः नामरूपे सर्वावस्थे ब्रह्मणा एव आत्मवती। न ब्रह्म तदात्मकम्।

ते तत्प्रत्याख्याने न स्तः एवेति तदात्मके उच्येते।

ताभ्यां च उपाधिभ्यां ज्ञातृ-ज्ञेय-ज्ञान-शब्दार्थादि-सर्व-संव्यवहारभाग् ब्रह्म।

**ब्रह्मणः पर्यालोचकत्वम्**

८४) सः आत्मा एवं-कामः सन् तपः अतप्यत। ‘तपः’ इति ज्ञानमुच्यते। “यस्य ज्ञानमयं तपः” (मु. १.१.९) इति श्रुत्यन्तरात्। आप्त-कामत्वाच्च इतरस्य असम्भव एव तपसः। तत् तपः अतप्यत तप्तवान्। सृज्यमान-जगद्रचनादि-विषयाम् आलेचनाम् अकरोद् आत्मा इत्यर्थः।

सः एवं आलोच्य तपस्तप्त्वा प्राणि-कर्मादि-निमित्तानुरूपम् इदं सर्वं जगद् देशतः, कालतः, नाम्ना, रूपेण च यथानुभवं सर्वैः प्राणिभिः सर्वावस्थैः अनुभूयमानम् असृजत सृष्टवान्। यदिदं किञ्च यत्किञ्च इदमविशिष्टम्।

तत् इदं जगत् सृष्ट्वा किमकरोत्? इत्युच्यते - तदेव सृष्टं जगद् अनुप्राविशत् इति।

**प्रवेशवाक्यार्थविचारः**

**विचारविषयोपन्यासः**

८५) तत्र एतच्चिन्त्यम्। कथमनुप्राविशदिति? किं यः स्रष्टा सः तेनैवात्मना अनुप्राविशत्, उत अन्येन इति। किं तावद्युक्तम्? क्त्वा-प्रत्यय-श्रवणात् यः स्रष्टा सः एव अनुप्राविशदिति।

**पूर्वपक्षिणा सिद्धान्तनिराकरणम्**

८६) ननु न युक्तम् मृद्वच्चेत्कारणं ब्रह्म। तदात्मकत्वात् कार्यस्य। कारणमेव हि कार्यात्मना परिणतमिति।

अतः अप्रविष्टे इव कार्योत्पत्तेः ऊर्ध्वं पृथक् कारणस्य पुनः प्रवेशोऽनुपपन्नः।

न हि घट-परिणाम-व्यतिरेकेण मृदः घटे प्रवेशोऽस्ति।

**पूर्वपक्षिणा स्वमतोत्थापनम्**

८७) यथा घटे चूर्णात्मना मृदः अनुप्रवेशः, एवम् अन्येन आत्मना नाम-रूप-कार्ये अनुप्रवेशः आत्मनः इति

चेत्। श्रुत्यन्तराच्च “अनेन जीवेन आत्मना अनुप्रविश्य” (छा. ६.३.२) इति।

**सिद्धान्ती**

८८) नैवं युक्तम्। एकत्वाद् ब्रह्मणः। मृदात्मनः तु अनेकत्वात्, सावयवत्वाच्च युक्तः घटे मृदः चूर्णात्मना

अनुप्रवेशः। मृदः चूर्णस्य अप्रविष्ट-देशवत्वाच्च। न तु आत्मनः एकत्वे सति निरवयवत्वात्, अप्रविष्ट-

देशाभावाच्च प्रवेशः उपपद्यते।

**पूर्वपक्षी**
८९) कथं तर्हि प्रवेशः स्यात्? युक्तश्च प्रवेशः। श्रुतत्वात् 'तदेवानुप्राविशत्' इति। सावयवमेवास्तु तर्हि।

सावयवत्वाद् मुखे हस्त-प्रवेशवत्, नाम-रूप-कार्ये जीवात्मना अनुप्रवेशः युक्तः एव इति चेत्।

**सिद्धान्ती**
९०) न। अशून्यत्वात्। न हि कार्यात्मना परिणतस्य नाम-रूप-कार्य-देश-व्यतिरेकेण आत्मशून्यः प्रदेशः अस्ति,

यं प्रविशेज्जीवात्मना।

**पूर्वपक्षी**
९१) कारणमेव चेत् प्रविशेत्।

**सिद्धान्ती**
९२) जीवात्मत्वं जह्यात्। यथा घटः मृत्प्रवेशे घटत्वं जहाति।

'तदेवानुप्राविशत्' इति च श्रुतेः न कारणानुप्रवेशो युक्तः।

**पूर्वपक्षी**
९३) कार्यान्तरमेव स्याद् इति चेत्।

'तदेवानुप्राविशत्' इति जीवात्मरूपं कार्यं नाम-रूप-परिणतं कार्यान्तरमेव आपद्यते इति चेत्।

**सिद्धान्ती**

९४) न। १) विरोधात्। न हि घटः घटान्तरमापद्यते। २) व्यतिरेक-श्रुति-विरोधाच्च। जीवस्य नाम-रूप-कार्य-व्यतिरेकानुवादिन्यः श्रुतयः विरुध्येरन्। ३) तदापत्तौ मोक्षासम्भवाच्च। न हि यतो मुच्यमानः तदेव आपद्यते। न हि श्रृङ्खलापत्तिः बद्धस्य तस्करादेः।

**पूर्वपक्षी**

९५) बाह्यान्तर्भेदेन परिणतमिति चेत्। तदेव कारणं ब्रह्म शरीराद्याधारत्वेन, तदन्तर्जीवात्मना आधेयत्वेन च परिणतमिति चेत्।

**सिद्धान्ती**

९६) न। बहिष्ठस्य प्रवेशोपपत्तेः। न हि यो यस्यान्तस्थः, स एव तत्प्रविष्टः इति उच्यते। बहिष्ठस्य अनुप्रवेशः स्यात्, प्रवेश-शब्दार्थस्य एवं दृष्टत्वात्। यथा ‘गृहं कृत्वा प्राविशत्’ इति।

**पूर्वपक्षी**

९७) जल-सूर्यकादि-प्रतिबिम्बवत् प्रवेशः स्याद् इति चेत्।

**सिद्धान्ती**

९८) न। अपरिच्छिन्नत्वात्, अमूर्त्तत्वाच्च। परिच्छिन्नस्य मूर्त्तस्य अन्यस्य अन्यत्र प्रसाद-स्वभावके जलादौ सूर्यकादि-प्रतिबिम्बोदयः स्यात्। न तु आत्मनः। अमूर्तत्त्वात्, आकाशादि-कारणस्य आत्मनः व्यापकत्वात्, तद्विप्रकृष्ट-देश-प्रतिबिम्बाधार-वस्त्वन्तराभावाच्च प्रतिबिम्बवत् प्रवेशो न युक्तः।

**पूर्वपक्षोपसंहारः**

९९) एवं तर्हि नैवास्ति प्रवेशः। न च गत्यन्तरम् उपलभामहे। 'तदेवानुप्राविशत्' इति श्रुतेः। श्रुतिश्च नः अतीन्द्रिय-विषये विज्ञानोत्पत्तौ निमित्तम्। न च अस्माद्वाक्याद् यत्नवतामपि विज्ञानमुत्पद्यते। हन्त! तर्हि अनर्थकत्वाद् अपोह्यमेतद्वाक्यम् 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति।

**ब्रह्मात्मैकत्वस्वरूपानुगमार्थम् (अनिर्वाच्य) प्रवेशकल्पनावचनम्**
**सिद्धान्ती**
१००) न। अन्यार्थत्वात्। किमर्थमिदम् अस्थाने चर्चा? प्रकृतः ह्यन्यः विवक्षितः अस्य वाक्यस्य अर्थोऽस्ति, स स्मर्त्तव्यः। “ब्रह्मविदाप्नोति परम्” (तै. २.१) “सत्यं ज्ञानमनन्तं ब्रह्म” (तै. २.१) “यो वेद निहितं गुहायाम्” (तै. २.१) इति। तद्विज्ञानं च विवक्षितम्, प्रकृतं च तत्। ब्रह्म-स्वरूपावगमाय च आकाशाद्यन्नमयान्तं कार्यं प्रदर्शितम्। ब्रह्मावगमश्च आरब्धः। तत्र, अन्नमयाद् आत्मनः अन्योऽन्तरः आत्मा प्राणमयः, तदन्तर्मनोमयः, विज्ञानमयः इति विज्ञान-गुहायां प्रवेशितः। तत्र च आनन्दमयः विशिष्टः आत्मा प्रदर्शितः। अतः परम् आनन्दमय-लिङ्गाधिगम-द्वारेण आनन्द-विवृद्ध्यवसानः आत्मा - ‘ब्रह्म पुच्छं प्रतिष्ठा’ - सर्व-विकल्पास्पदः निर्विकल्पः अस्यामेव गुहायाम् अधिगन्तव्यः इति तत्प्रवेशः प्रकल्प्यते।

**बुद्ध्याभासविशेषस्य ब्रह्मावगमसाधनम्**

१०१) न हि अन्यत्र उपलभ्यते ब्रह्म, निर्विशेषत्वात्। विशेष-सम्बन्धः हि उपलब्धि-हेतुः दृष्टः। यथा राहोः चन्द्रार्क-विशेष-सम्बन्धः। एवम् अन्तःकरण-गुहा-आत्म-सम्बन्धः ब्रह्मणः उपलब्धि-हेतुः। सन्निकर्षात्, अवभासात्मकत्वाच्च अन्तः-करणस्य। यथा च आलेक-विशिष्टा घटाद्युपलब्धिः, एवं बुद्धि-प्रत्ययालोक-विशिष्टा आत्मोपलब्धिः स्यात्। तस्माद् उपलब्धि-हेतौ 'गुहायां निहितम्' इति प्रकृतमेव। तद्-वृत्ति-स्थानीये तु इह पुनः 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति उच्यते।

**ब्रह्मसद्भावे (२) द्वितीयो हेतुः - बुद्धौ उपलभ्यमानत्वम्**

१०२) तदेव इदम् आकाशादि-कारणं कार्यं सृष्ट्वा तदनुप्रविष्टम् इव अन्तर्गुहायां बुद्धौ द्रष्टृ, श्रोतृ, मन्तृ, विज्ञातृ इत्येवं विशेषवद् उपलभ्यते। सः एव तस्य प्रवेशः। तस्मादस्ति तत्कारणं ब्रह्म। अतः अस्तित्वाद् 'अस्ति इत्येव उपलब्धव्यम्' (क. २.३.१३) तत्।

**ब्रह्मसद्भावे तृतीयो हेतुः - ब्रह्मणः सर्वनामरूपात्मकत्वेन चेतनाचेतनात्मकत्वेन च अवभासमानाच्च**

१०३) तत् कार्यम् अनुप्रविश्य। किम्? सच्च मूर्त्तम्, त्यच्च अमूर्त्तम्, अभवत्।

मूर्त्तामूर्त्ते हि अव्याकृत-नामरूपे आत्मस्थे अन्तर्गतेन आत्मना व्याक्रियेते। व्याकृते च मूर्त्तामूर्त्त-शब्द-वाच्ये ते

आत्मना तु अप्रविभक्त-देश-काले इति कृत्वा, आत्मा ते अभवद् इति उच्यते।

किञ्च निरुक्तं च, अनिरुक्तं च। निरुक्तं नाम निष्कृष्य समानासमान-जातीयेभ्यः देश-काल-विशिष्टतया इदं तद्

इति उक्तम्। अनिरुक्तं तद्विपरीतम्। निरुक्तानिरुक्ते अपि मूर्त्तामूर्त्तयोरेव विशेषणे।

यथा सच्च त्यच्च प्रत्यक्ष-परोक्षे तथा निलयनं च, अनिलयनं च। निलयनं नीडम्, आश्रयः। मूर्त्तस्य एव धर्मः।

अनिलयनं तद्विपरीतम्। अमूर्त्तस्य एव धर्मः। त्यद्-अनिरुक्तानिलयनानि अमूर्त्त-धर्मत्वेऽपि व्याकृत-विषयाण्येव।

सर्गोत्तर-काल-भाव-श्रवणात्। त्यदिति प्राणादि। अनिरुक्तं तदेव। अनिलयनं च।

अतो विशेषणानि अमूर्त्तस्य व्याकृत-विषयाण्येव एतानि।

विज्ञानं चेतनम्। अविज्ञानं तद्रहितमचेतनं पाषाणादि। सत्यं च व्यवहार-विषयम्। अधिकारात्।

न परमार्थ-सत्यम्। एकमेव हि परमार्थ-सत्यं ब्रह्म। इह पुनः व्यवहार-विषयमापेक्षिकं सत्यम्।

मृग-तृष्णिकाद्यनृतापेक्षया उदकादि 'सत्यम्' उच्यते। अनृतं च तद्विपरीतम्।

किं पुनरेतत्सर्वम् अभवत्? सत्यम् परमार्थ-सत्यम्। किं पुनस्तत्? ब्रह्म।

'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रकृतत्वात्।

यस्मात् सत्-त्यदादिकं मूर्तामूर्त-धर्म-जातं यद् किञ्च इदं सर्वम् अविशिष्टं विकार-जातम् एकमेव सच्छब्द-वाच्यं

ब्रह्म अभवत्, तद्-व्यतिरेकेण अभावाद् नाम-रूप-विकारस्य, तस्मात् तद् ब्रह्म सत्यमिति आचक्षते ब्रह्मविदः।

**प्रवेशबहुभवनप्रकरणस्य फलितार्थम्**

१०४) अस्ति, नास्ति इति अनुप्रश्नः प्रकृतः।

तस्य प्रतिवचन-विषये एतदुक्तम् - आत्मा 'अकामयत बहु स्याम्' इति।

सः यथा-कामं च आकाशादि-कार्यं सत्-त्यदादि-लक्षणं सृष्ट्वा तदनुप्रविश्य पश्यन् श्रृण्वन् मन्वानः विजानन्

बह्वभवत्। तस्मात् तदेव इदम् – आकाशादि-कारणम्, कार्यस्थम्, परमे व्योमन् हृदय-गुहायां निहितम्,

तत्प्रत्यय-अवभास-विशेषेण उपलभ्यमानम् – 'अस्ति' इति एवं विजानीयाद् इत्युक्तं भवति।

**सर्वान्तरतमात्मास्तित्वप्रकाशकमन्त्रावतरणिका**

१०५) तद् एतस्मिन् अर्थे ब्राह्मणोक्ते एषः श्लोकः मन्त्रः भवति। यथा पूर्वेषु अन्नमयाद्यात्म-प्रकाशकाः पञ्चसु

अपि, एवं सर्वान्तरतमात्मास्तित्व-प्रकाशकः अपि मन्त्रः कार्यद्वारेण भवति।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-आनन्दवल्ली-भाष्ये षष्ठोऽनुवाकः।।

सप्तमोऽनुवाकः

असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानꣳस्वयमकुरुत।

तस्मात्तत्सुकृतमुच्यत इति। यद्वै तत्सुकृतम्। रसो वै सः।

रसꣳह्येवायं लब्ध्वाऽऽनन्दी भवति। को ह्येवान्यात् कः प्राण्यात्।

यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति।

यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते।

अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति।

तत्त्वेव भयं विदुषोऽमन्वानस्य। तदप्येष श्लोको भवति॥ २.७॥

**ब्रह्मसद्भावे (४) चतुर्थो हेतुः - सुकृतप्रसिद्धेः**

१०६) असद् वै इदमग्रे आसीत्। असत् इति व्याकृत-नाम-रूप-विशेष-विपरीतरूपम् अव्याकृतं ब्रह्म उच्यते।

न पुनः अत्यन्तमेव असत्। न हि असतः सज्जन्मास्ति। इदम् इति नाम-रूप-विशेषवद् व्याकृतं जगत्। अग्रे पूर्वं

प्रागुत्पत्तेः ब्रह्म एव असच्छब्द-वाच्यम् आसीत्। ततः असतः वै सत् प्रविभक्त-नाम-रूप-विशेषम् अजायत

उत्पन्नम्। किं ततः प्रविभक्तं कार्यमिति, पितुः इव पुत्रः? न इत्याह - तत् असच्छब्द-वाच्यं स्वयम् एव आत्मानम् एव अकुरुत कृतवत्।

यस्मादेवम्, तस्मात् तद् ब्रह्मैव सुकृतं स्वयं कर्तृ उच्यते। 'स्वयं कर्तृ ब्रह्म' इति प्रसिद्धं लोके, सर्व-कारणत्वात्। यस्माद्वा स्वयम् अकरोत् सर्वं सर्वात्मना, तस्मात् पुण्यरूपेणापि तदेव ब्रह्म कारणं सुकृतमुच्यते। सर्वथा अपि तु फल-सम्बन्धादि-कारणं सुकृत-शब्द-वाच्यं प्रसिद्धं लोके। यदि पुण्यं यदि वा अन्यत्, सा प्रसिद्धिः नित्ये चेतनवत्-कारणे सति उपपद्यते। तस्मादस्ति तद् ब्रह्म, सुकृत-प्रसिद्धेः।

**ब्रह्मसद्भावे (५) पञ्चमो हेतुः - रसत्वप्रसिद्धेः**

१०७) इतश्चास्ति। कुतः? रसत्वात्। कुतो रसत्व-प्रसिद्धिः ब्रह्मणः? इत्यत आह - यद् वै तत् सुकृतम्। रसो वै सः। रसो नाम तृप्ति-हेतुः, आनन्दकरः, मधुराम्लादिः प्रसिद्धः लोके। रसम् एव हि अयं लब्ध्वा प्राप्य आनन्दी सुखी भवति। न असतः आनन्द-हेतुत्वं दृष्टं लोके।

बाह्यानन्द-साधन-रहिताः अपि अनीहाः निरेषणाः ब्राह्मणाः बाह्य-रस-लाभाद् इव सानन्दाः दृश्यन्ते विद्वांसः।

नूनं ब्रह्म एव रसः तेषाम्। तस्मात्, अस्ति तत् तेषाम् आनन्द-कारणं रसवद् ब्रह्म।

**ब्रह्मसद्भावे (६) षष्ठो हेतुः - कार्यकरणसङ्घातस्य प्राणनादिक्रियादर्शनात्**

१०८) इतश्च अस्ति। कुतः? प्राणनादि-क्रिया-दर्शनात्। अयमपि हि पिण्डः जीवतः प्राणेन प्राणिति, अपानेन अपानिति इति। एवं वायवीयाः ऐन्द्रियकाः च चेष्टाः संहतैः कार्य-करणैः निर्वर्त्यमानाः दृश्यन्ते।

तच्च एकार्थ-वृत्तित्वेन संहननं नान्तरेण चेतनम् असंहतं सम्भवति। अन्यत्रादर्शनात्। तदाह - यद् यदि एषः आकाशे परमे व्योम्नि गुहायां निहितः आनन्दः न स्यात् न भवेत्, को हि एव लोके अन्यात् अपान-चेष्टां कुर्याद् इत्यर्थः। कः प्राण्यात्। प्राणनं वा कुर्यात्? तस्मात्, अस्ति तद् ब्रह्म यदर्थाः कार्य-करण-प्राणनादि-चेष्टाः।

तत्कृतः एव च आनन्दः लोकस्य। कुतः? एष हि एव पर आत्मा आनन्दयाति आनन्दयति। सुखयति लोकं धर्मानुरूपम्। स एव आत्मा आनन्दरूपः अविद्यया परिच्छिन्नः विभाव्यते प्राणिभिः इत्यर्थः।

**ब्रह्मसद्भावे (७) सप्तमो हेतुः - भयाभयहेतुत्वात्**

१०८) भयाभय-हेतुत्वाद् विद्वद्-अविदुषोः अस्ति तद् ब्रह्म। सद्वस्त्वाश्रयणेन हि अभयं भवति, न असद्-वस्त्वाश्रयणेन भय-निवृत्तिः उपपद्यते। कथम् अभय-हेतुत्वम्? इत्युच्यते - यदा ह्येव यस्माद् एषः साधकः एतस्मिन् ब्रह्मणि। किं-विशिष्टे? अदृश्ये। दृश्यं नाम द्रष्टव्यम्, विकारः। दर्शनार्थत्वाद् विकारस्य। न दृश्यम् अदृश्यम्। अविकारः इत्यर्थः। एतस्मिन् अदृश्ये, अविकारे, अविषय-भूते। अनात्म्ये अशरीरे। यस्माद् अदृश्यं तस्माद् अनात्म्यम्। यस्माद् अनात्म्यं तस्माद् अनिरुक्तम्। विशेषो हि निरुच्यते। विशेषश्च विकारः। अविकारं च ब्रह्म। सर्व-विकार-हेतुत्वात्। तस्माद् अनिरुक्तम्। यत एवं, तस्माद् अनिलयनम्। निलयनं नीडः, आश्रयः। न निलयनमनिलयनम्, अनाधारम्। तस्मिन्नेतस्मिन् अदृश्ये अनात्म्येऽनिरुक्तेऽनिलयने सर्व-कार्य-धर्म-विलक्षणे ब्रह्मणि इति वाक्यार्थः। अभयम् इति क्रिया-विशेषणम्। 'अभयाम्' इति वा लिङ्गान्तरं परिणम्यते।

प्रतिष्ठां स्थितिम् आत्म-भावं विन्दते लभते। अथ तदा सः तस्मिन् नानात्वस्य भय-हेतोः अविद्या-कृतस्य अदर्शनाद् अभयं गतः भवति।

स्वरूप-प्रतिष्ठः हि असौ यदा भवति तदा नान्यत् पश्यति, नान्यत् श्रृणोति, नान्यद् विजानाति।

अन्यस्य हि अन्यतः भयं भवति। न आत्मनः एव आत्मनः भयं युक्तम्। तस्माद् आत्मा एव आत्मनः अभय-कारणम्। सर्वतो हि निर्भयाः ब्राह्मणाः दृश्यन्ते सत्सु भय-हेतुषु। तच्चायुक्तम् असति भय-त्राणे ब्रह्मणि। तस्मात् तेषाम् अभय-दर्शनाद् अस्ति तदभय-कारणं ब्रह्म इति। कदा असौ अभयं गतो भवति साधकः**?** यदा नान्यत् पश्यति, आत्मनि च अन्तरं भेदं न कुरुते, तदा अभयं गतो भवति इत्यभिप्रायः।

**भेददर्शनस्य भयकारणत्वम्**

१०९) यदा पुनः अविद्यावस्थायां हि यस्माद् एषः अविद्यावान् अविद्यया प्रत्युपस्थापितं वस्तु तैमिरिक-द्वितीय-चन्द्रवत् पश्यति, आत्मनि च एतस्मिन् ब्रह्मणि उद् अपि अरम् अल्पमपि अन्तरं छिद्रं भेदं भेद-दर्शनं कुरुते।

भेद-दर्शनम् एव हि अन्तर-कारणम्। अल्पमपि भेदं पश्यति इत्यर्थः। अथ तस्माद् भेद-दर्शनाद् हेतोः तस्य भेद-दर्शिनः आत्मनः भयं भवति। तस्माद् आत्मा एव आत्मनः भय-कारणम् अविदुषः।

**भेददर्शिनः अविदुषः ब्रह्म भयम्**

११०) तदेतदाह - तत् ब्रह्म तु एव भयं भेद-दर्शिनः विदुषः 'ईश्वरः अन्यः मत्तः, अहमन्यः संसारी' इत्येवं विदुषः, भेद-दृष्टं ईश्वराख्यं तदेव ब्रह्म अल्पमप्यन्तरं कुर्वतः भयं भवति एकत्वेन अमन्वानस्य। तस्माद् विद्वान् अपि अविद्वानेव असौ, योऽयं एकमभिन्नम् आत्म-तत्वं न पश्यति। उच्छेद-हेतु-दर्शनाद् हि उच्छेद्याभिमतस्य भयं भवति। अनुच्छेद्यः हि उच्छेद-हेतुः। तत्र असति उच्छेद-हेतौ अनुच्छेद्ये न तद्दर्शनकार्यं भयं युक्तम्। सर्वं च जगद् भयवद्दृश्यते। तस्मात्, जगतो भयदर्शनात्, गम्यते नूनं तदस्ति भय-कारणम् उच्छेद-हेतुः अनुच्छेद्यात्मकम्, यतो जगद्बिभेति इति। तद् एतस्मिन् अपि अर्थे एषः श्लोकः भवति।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-आनन्दवल्ली-भाष्ये सप्तमोऽनुवाकः।।

## अष्टमोऽनुवाकः

भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति।

सैषाऽऽनन्दस्य मीमाꣳसा भवति। युवा स्यात्साधु युवाध्यायकः। आशिष्ठो द्रढिष्ठो बलिष्ठः।

तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः॥

२.८.१॥

स एको मनुष्यगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः।

स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वाणामानन्दाः।

स एकः पितृणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य।

ते ये शतं पितृणां चिरलोकलोकानामानन्दाः। स एक आजानजानां देवानामानन्दः॥ २.८.२॥

श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दः।

ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां देवानामानन्दाः।

स एको देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः॥

२.८.३॥

श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः।

श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः।

श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः।

श्रोत्रियस्य चाकामहतस्य॥ २.८.४॥

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः। स य एवंवित्। अस्माल्लोकात्प्रेत्य।

एतमन्नमयमात्मान-मुपसंक्रामति। एतं प्राणमयमात्मानमुपसंक्रामति।

एतं मनोमयमात्मानमुप-संक्रामति। एतं विज्ञानमयमात्मान-मुपसंक्रामति।

एतमानन्द-मयमात्मानमुपसंक्रामति। तदप्येष श्लोको भवति॥ २.८.५॥

**भयहेतुप्रकाशकमन्त्रार्थः**
१११) भीषा भयेन अस्मात्, वातः पवते। भीषा उदेति सूर्यः। भीषा अस्मात् अग्निश्च इन्द्रश्च।

मृत्युर्धावति पञ्चम इति।

वातादयो हि महार्हाः स्वयमीश्वराः सन्तः पवनादि-कार्येषु आयास-बहुलेषु नियताः प्रवर्त्तन्ते।

तद् युक्तं प्रशास्तरि सति अन्यस्मिन् नियमेन तेषां प्रवर्त्तनम्। तस्मात्, अस्ति भय-कारणं तेषां प्रशास्तृ ब्रह्म

यतस्ते भृत्या इव राज्ञः अस्माद् ब्रह्मणः भयेन प्रवर्त्तन्ते। तच्च भयकारणमानन्दं ब्रह्म।

**आनन्दमीमांसाविषयः - ब्रह्मानन्दः जन्यः स्वाभाविकी वा इति**
११२) तस्य अस्य ब्रह्मणः आनन्दस्य एषा मीमांसा विचारणा भवति।

किम् आनन्दस्य मीमांस्यम्? इत्युच्यते - किमानन्दः विषय-विषयि-सम्बन्ध-जनितः लौकिकानन्दवत्,

आहोस्वित् स्वाभाविकः इत्येवम् एषा आनन्दस्य मीमांसा।

**आनन्दमीमांसाप्रयोजनम् - विषयानन्दद्वारा ब्रह्मानन्दानुगमः**

११३) तत्र लौकिकः आनन्दः बाह्याध्यात्मिक-साधन-सम्पत्ति-निमित्तः उत्कृष्टः। सः य एषः निर्दिश्यते ब्रह्मानन्दानुगमार्थम्। अनेन हि प्रसिद्धेन आनन्देन व्यावृत्त-विषय-बुद्धि-गम्यः आनन्दः अनुगन्तुं शक्यते। लौकिकोऽपि आनन्दः ब्रह्मानन्दस्य एव मात्रा। अविद्यया तिरस्क्रियमाणे विज्ञाने, उत्कृष्यमाणायां च अविद्यायाम्, ब्रह्मादिभिः कर्म-वशाद् यथा-विज्ञानं विषयादि-साधन-सम्बन्ध-वशाच्च विभाव्यमानः च लोके अनवस्थितः लौकिकः सम्पद्यते। स एव अविद्या-काम-कर्मापकर्षेण मनुष्य-गन्धर्वाद्युत्तरोत्तर-भूमिषु अकामहत-विद्वच्छ्रोत्रिय-प्रत्यक्षः विभाव्यते शत-गुणोत्तरोत्तरोत्कर्षेण यावद् हिरण्यगर्भस्य ब्रह्मणः आनन्द इति। निरस्ते तु अविद्या-कृते विषय-विषयि-विभागे विद्यया, स्वाभाविकः परिपूर्णः एकः आनन्दः अद्वैतः भवति इत्येतमर्थं विभावयिष्यन्नाह।

**अनन्दोत्कर्षप्रत्याख्यनार्थं मनुष्यानन्दस्य एकत्वेन ग्रहणम्**

११४) युवा प्रथम-वयाः साधुयुवा इति साधुश्च असौ युवा च इति यूनः विशेषणम्। युवाऽपि असाधुर्भवति, साधुरपि अयुवा। अतो विशेषणं 'युवा स्यात् साधुयुवा' इति। अध्यायकः अधीत-वेदः। आशिष्ठः आशुतमः। दृढिष्ठः दृढतमः। बलिष्ठः बलवत्तमः। एवम् आध्यात्मिक-साधन-सम्पन्नः। तस्येयं पृथिवी उर्वी सर्वा वित्तस्य वित्तेन उपभोग-साधनेन, दृष्टार्थेन अदृष्टार्थेन च कर्म-साधनेन, सम्पन्ना पूर्णा। राजा पृथिवी-पतिः इत्यर्थः। तस्य च यः आनन्दः सः एको मानुषः मनुष्याणां प्रकृष्टः एकः आनन्दः।

**मनुष्यगन्धर्वानन्दस्य उत्कृष्टत्वे निमित्तम्, तन्निमित्तस्य उत्तरत्र अतिदेशश्च**

११५) ते ये शतं मानुषा आनन्दाः। स एको मनुष्य-गन्धर्वाणामानन्दः। मानुषानन्दात् शतगुणेन उत्कृष्टः मनुष्य-गन्धर्वाणामानन्दः भवति। मनुष्याः सन्तः कर्म-विद्या-विशेषाद् गन्धर्वत्वं प्राप्ताः मनुष्य-गन्धर्वाः। ते हि अन्तर्धानादि-शक्ति-सम्पन्नाः सूक्ष्म-कार्य-करणाः।

तस्मात् प्रतिघाताल्पत्वं तेषाम्, द्वन्द्व-प्रतिघात-शक्तिः साधन-सम्पत्तिश्च। ततः अप्रतिहन्यमानस्य प्रतीकारवतः मनुष्य-गन्धर्वस्य स्यात् चित्त-प्रसादः।

तत्प्रसाद-विशेषात् सुख-विशेषाभिव्यक्तिः। एवं पूर्वस्याः पूर्वस्याः भूमेः उत्तरस्याम् उत्तरस्यां भूमौ प्रसाद-विशेषतः शत-गुणेन आनन्दोत्कर्षः उपपद्यते।

**श्रोत्रियत्वमवृजिनत्वमकामहतत्वं च परमानन्दप्राप्तिसाधनत्रयम्**

११६) प्रथमं तु अकामहताग्रहणं मनुष्य-विषय-भोग-कामानभिहतस्य श्रोत्रियस्य मनुष्यानन्दात् शत-गुणेन आनन्दोत्कर्षः मनुष्य-गन्धर्वेण तुल्यः वक्तव्यः इत्येवमर्थम्। 'साधुयुवाध्यायकः' इति श्रोत्रियत्वावृजिनत्वे गृह्येते। ते हि अविशिष्टे सर्वत्र। अकामहतत्वं तु विषयोत्कर्षापकर्षतः सुखोत्कर्षापकर्षाय विशेष्यते।

अतः अकामहत-ग्रहणं तद्विशेषतः शत-गुण-सुखोत्कर्षोपलब्धेः अकामहतत्वस्य परमानन्द-प्राप्ति-साधनत्व-विधानार्थम्। व्याख्यातम् अन्यत्।

**आनन्दोत्कर्षस्य अवान्तरस्थानानि**

११७) देव-गन्धर्वाः जातितः एव। चिरलोकलोकानाम् इति पितॄणां विशेषणम्।

चिर-काल-स्थायी लोको येषां पितॄणां ते चिर-लोक-लोकाः इति। आजानः इति देव-लोकः।

तस्मिन्नाजाने जाताः आजानजाः देवाः, स्मार्त्त-कर्म-विशेषतः देव-स्थानेषु जाताः। कर्म-देवाः ये वैदिकेन कर्मणा

अग्निहोत्रादिना केवलेन देवान् अपियन्ति। देवाः इति त्रयस्त्रिंशद् हविर्भुजः। इन्द्रः तेषां स्वामी।

तस्य आचार्यः बृहस्पतिः। प्रजापतिः विराट्, त्रै-लोक्य-शरीरः।

**आनन्दोत्कर्षस्य चरमस्थानम् (ब्रह्मणः स्थानम्)**

११८) ब्रह्मा समष्टि-व्यष्टि-रूपः संसार-मण्डल-व्यापी। यत्र एते आनन्द-भेदाः एकतां गच्छन्ति, धर्मश्च

तन्निमित्तः, ज्ञानं च तद्विषयम्, अकामहतत्वं च निरतिशयं यत्र, स एषः हिरण्यगर्भः ब्रह्मा।

तस्य एषः आनन्दः श्रोत्रियेण, अवृजिनेन, अकामहतेन च सर्वतः प्रत्यक्षम् उपलभ्यते।

तस्मादेतानि त्रीणि साधनानि इति अवगम्यते। तत्र श्रोत्रियत्वावृजिनत्वे नियते।

अकाम-हतत्वं तु उत्कृष्यते इति प्रकृष्ट-साधनता अवगम्यते।

**हिरण्यगर्भानन्दः परमानन्दस्य मात्रा**

११९) तस्य अकाम-हतत्व-प्रकर्षतः च उपलभ्यमानः श्रोत्रिय-प्रत्यक्षः ब्रह्मणः आनन्दः यस्य परमानन्दस्य मात्रा एकदेशः। "एतस्यैव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति" (बृ. ४.३.३२) इति श्रुत्यन्तरात्।

स एष आनन्दः यस्य मात्रा समुद्राम्भसः इव विप्रुट्, प्रविभक्ता यत्रैकतां गता, स एषः परमानन्दः स्वाभाविकः, अद्वैतत्वात्। आनन्दानन्दिनोः च अविभागः अत्र।

**मीमांसा-फलोपसंहारः**

१२०) तदेतन्मीमांसा-फलम् उपसंह्रियते - 'स यश्चायं पुरुषे' इति। यः गुहायां निहितः परमे व्योम्नि आकाशादि-कार्यं सृष्ट्वा अन्नमयान्तम्, तदेवानुप्रविष्टः सः 'यः' इति निर्दिश्यते। कोऽसौ? अयं पुरुषे।

यश्चासावादित्ये। यः परमानन्दः श्रोत्रिय-प्रत्यक्षः निर्दिष्टः, यस्य एकदेशं ब्रह्मादीनि भूतानि सुखार्हाणि उपजीवन्ति

सः ‘यश्चासावादित्ये’ इति निर्दिश्यते। स एकः। भिन्न-प्रदेशस्थ-घटाकाशाकाशैकत्ववत्।

**स यश्चायमित्यादिवाक्ये आदित्यग्रहणस्य तात्पर्यम्**
**पूर्वपक्षः**
१२१) ननु तन्निर्देशे ‘स यश्चायं पुरुषे’ इत्यविशेषतः अध्यात्मं न युक्तो निर्देशः।

“यश्चायं दक्षिणे अक्षन्” (बृ. २.३.५) इति तु युक्तः, प्रसिद्धत्वात्।

**सिद्धान्तः**
१२२) न। पराधिकारात्। परो ह्यात्मा अत्र अधिकृतः निर्दिश्यते “अदृश्येऽनात्म्ये” (तै. २.७), “भीषास्माद्वातः

पवते” (तै. २.८), “सैषानन्दस्य मीमांसा” (तै. २.८) इति। न हि अकस्माद् अप्रकृतः युक्तो निर्देष्टुम्।

परमात्म-विज्ञानं च विवक्षितम्। तस्मात् पर एव निर्दिश्यते ‘सः एकः’ इति। ननु आनन्दस्य मीमांसा प्रकृता।

तस्या अपि फलमुपसंहर्त्तव्यम् ‘अभिन्नः स्वाभाविकः आनन्दः परमात्मैव, न विषय-विषयि-सम्बन्ध-जनितः’

इति। ननु तदनुरूपः एव अयं निर्देशः ‘स यश्चायं पुरुषे यश्चासावादित्ये स एकः’ इति भिन्नाधिकरणस्थ-

विशेषोपमर्देन।

**पूर्वपक्षः**

१२३) ननु एवमपि आदित्य-विशेष-ग्रहणमनर्थकम्।

**सिद्धान्तः**

१२४) न अनर्थकम्। उत्कर्षापकर्षापोहार्थत्वात्। द्वैतस्य हि मूर्त्तामूर्त्त-लक्षणस्य पर उत्कर्षः सवित्रभ्यन्तर्गतः।

स चेत् पुरुष-गत-विशेषोपमर्देन परमानन्दमपेक्ष्य समो भवति, न कश्चित् उत्कर्षः अपकर्षः वा तां गतिं गतस्य

इति ‘अभयं प्रतिष्ठां विन्दते’ इत्युपपन्नम्।

**पूर्वोत्तरग्रन्थसङ्गतिः**

१२५) अस्ति नास्ति इत्यनुप्रश्नः व्याख्यातः। कार्य-रसलाभ-प्राणन-अभयप्रतिष्ठा-भयदर्शनोपपत्तिभ्यः अस्त्येव

तदाकाशादि-कारणं ब्रह्म इत्यपाकृतः अनुप्रश्नः एकः। द्वौ अन्यौ अनुप्रश्नौ विद्वदविदुषोः ब्रह्म-प्राप्त्यप्राप्ति-विषयौ।

तत्र विद्वान् समश्नुते, न समश्नुते इत्यनुप्रश्नः अन्त्यः। तदपाकरणाय उच्यते। मध्यमः अनुप्रश्नः अन्त्यापाकरणादेव अपाकृतः इति तदपाकरणाय न यत्यते।

**आनन्दमयसङ्क्रमणनिर्देशेन एव पुच्छप्रतिष्ठाभूतब्रह्मप्राप्तेः फलस्य निर्देशः**

१२६) सः यः कश्चिद् एवं यथोक्तं ब्रह्म, उत्सृज्य उत्कर्षापकर्षम्, 'अद्वैतं सत्यं ज्ञानमनन्तम् अस्मि' इत्येवं वेत्तीति एवंवित्। एवं-शब्दस्य प्रकृत-परामर्शार्थत्वात्। सः किम्? अस्माल्लोकात् प्रेत्य।

दृष्टादृष्टेष्ट-विषय-समुदायो हि अयं लोकः। तस्मात् अस्माल्लोकात् प्रेत्य प्रत्यावृत्य, निरपेक्षो भूत्वा, एतं यथाव्याख्यातम् अन्नमयम् आत्मानम् उपसङ्क्रामति विषय-जातम् अन्नमयात्पिण्डात्मनः व्यतिरिक्तं न पश्यति। सर्वं स्थूल-भूतमन्नमयात्मानं पश्यति इत्यर्थः। ततः अभ्यन्तरम् एतं प्राणमयं सर्वान्नमयात्मस्थम् अविभक्तम्। अथैतं मनोमयं विज्ञानमयम् आनन्दमयम् आत्मानमुपसङ्क्रामति।

अथ एवंविद् अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने अभयं प्रतिष्ठां विन्दते।

**सङ्क्रमणवाक्यार्थविचारः**
**विचारविषयः**
१२७) तत्रैतत् चिन्त्यम्। कोऽयम् एवं-वित्, कथं वा सङ्क्रामति इति। किं परस्मादात्मनोऽन्यः सङ्क्रमण-कर्त्ता प्रविभक्तः, उत स एव इति।

**पूर्वपक्षी**
किं ततः**?** यद्यन्यः स्यात्, श्रुति-विरोधः। “तत्सृष्ट्वा तदेवानुप्राविशत्” (तै. २.६) “अन्योऽसावन्योऽहमस्मीति न स वेद” (बृ. १.४.१०) “एकमेवाद्वितीयम्” (छा. ६.२.१) “तत्त्वमसि” (छा. ६.८.७) इति।

अथ स एव, आनन्दमयमात्मानमुप-सङ्क्रामति इति कर्म-कर्तृत्वानुपपत्तिः।

परस्यैव च संसारित्वम्, पराभावो वा। यद्युभयथा प्राप्तः दोषो न परिहर्त्तुं शक्यते इति, व्यर्था चिन्ता। अथ अन्यतरस्मिन् पक्षे दोषाप्राप्तिः, तृतीये वा पक्षे अदुष्टे, स एव शास्त्रार्थः इति व्यर्था एव चिन्ता।

**सिद्धान्ती**
न। तन्निर्धारणार्थत्वात्। सत्यं प्राप्तः दोषः न शक्यः परिहर्त्तुम् अन्यतरस्मिन्, तृतीये वा पक्षे अदुष्टे अवधृते व्यर्था चिन्ता स्यात्। न तु सः अवधृतः इति तदव-धारणार्थत्वाद् अर्थवती एव एषा चिन्ता।

**पूर्वपक्षी**
सत्यम् अर्थवती चिन्ता, शास्त्रार्थावधारणार्थत्वात्। चिन्तयसि च त्वम्। न तु निर्णेष्यसि।

**सिद्धान्ती**
किं न निर्णेतव्यमिति वेद-वचनम्**?**

**पूर्वपक्षी**
न।

**सिद्धान्ती**
कथं तर्हि**?**

**पूर्वपक्षी**
बहु-प्रतिपक्षत्वात्। एकत्व-वादी त्वम्, वेदार्थ-परत्वात्। बहवः हि नानात्व-वादिनः वेद-बाह्याः त्वत्प्रतिपक्षाः।

अतो ममाशङ्का न निर्णेष्यसि इति।

**सिद्धान्ती**
एतदेव मे स्वस्त्ययनं यन्माम् एक-योगिनम् अनेक-योगि-बहु-प्रतिपक्षमात्थ। अतो जेष्यामि सर्वान्। आरभे च

चिन्ताम्।

**सिद्धान्ती**
**सङ्क्रमणकर्ता परात्मा एव**
१२८) सः एव तु स्यात्, तद्भावस्य विवक्षितत्वात्। तद्विज्ञानेन परमात्म-भावः हि अत्र विवक्षितः 'ब्रह्मविदाप्नोति

परम्' इति। न हि अन्यस्य अन्य-भावापत्तिः उपपद्यते।

**पूर्वपक्षी**
ननु तस्यापि तद्भावापत्तिः अनुपपन्ना एव।

**सिद्धान्ती**
न। अविद्याकृत-तादाम्यापोहार्थत्वात्। या हि ब्रह्म-विद्यया स्वात्म-प्राप्तिः उपदिश्यते, सा अविद्या-कृतस्य अन्नमयादि-विशेषात्मनः आत्मत्वेन अध्यारोपितस्य अनात्मनः अपोहार्था।

**पूर्वपक्षी**
कथमेवमर्थता अवगम्यते?

**सिद्धान्ती**
**प्राप्तिशब्दस्य 'अनात्मनः अपोहार्थत्वे', अन्यसाधनरहित-विद्यामात्रोपदेशः लिङ्गम्**
विद्या-मात्रोपदेशात्। विद्यायाश्च दृष्टं कार्यम् अविद्या-निवृत्तिः। तच्चेह विद्या-मात्रम् आत्म-प्राप्तौ साधनमुपदिश्यते।

**पूर्वपक्षी**
**विद्यामात्रोपदेशे अपि प्राप्तिशब्दस्य मुख्यार्थत्वमेव ग्रामप्राप्तिवदिति**
१२९) मार्ग-विज्ञानोपदेशवत् इति चेत्। तदात्मत्वे विद्या-मात्र-साधनोपदेशः अहेतुः। कस्मात्? देशान्तर-प्राप्तौ मार्ग-विज्ञानोपदेश-दर्शनात्। न हि ग्राम एव गन्ता इति चेत्।

**सिद्धान्ती**

**दृष्टान्तस्य वैधर्म्यात्**

१२०) न। वैधर्म्यात्। तत्र हि ग्राम-विषयं विज्ञानं नोपदिश्यते, तत्प्राप्ति-मार्ग-विषयमेव उपदिश्यते विज्ञानम्। न तथा इह ब्रह्म-विज्ञान-व्यतिरेकेण साधनान्तर-विषयं विज्ञानम् उपदिश्यते।

**पूर्वपक्षी**

**साधनान्तरोपदेशात्**

१२१) उक्त-कर्मादि-साधनापेक्षं ब्रह्म-विज्ञानं पर-प्राप्तौ साधनमुपदिश्यते इति चेत्।

**सिद्धान्ती**

**१. परप्राप्तिः न साधनान्तरसाध्या**

१२२) न। 'नित्यत्वाद् मोक्षस्य' (भाष्य-भागः १.६६) इत्यादिना प्रत्युक्तत्वात्। श्रुतिश्च "तत्सृष्ट्वा तदेवानुप्राविशत्" (तै.उप. २.६) इति कार्यस्थस्य तदात्मत्वं दर्शयति।

**२. अभेदपक्षे अभयप्रतिष्ठोपपत्तेः**

१२३) अभय-प्रतिष्ठोपपत्तेः च। यदि हि विद्यावान् स्वात्मनः अन्यन्न पश्यति, ततः "अभयं प्रतिष्ठां विन्दते" (तै. २.६) इति स्यात्। भय-हेतोः परस्य अन्यस्य अभावात्। अन्यस्य च अविद्या-कृतत्वे, विद्यया अवस्तुत्व-दर्शनोपपत्तिः। तद्धि द्वितीयस्य चन्द्रस्य सत्वं यद् अतैमिरिकेण चक्षुष्मता न गृह्यते।

**द्वैताग्रहणमात्मनि स्वाभाविकम्**
**पूर्वपक्षी**
१२४) नैवं न गृह्यते इति चेत्।

**सिद्धान्ती**
न। सुषुप्त-समाहितयोः अग्रहणात्।

**पूर्वपक्षी**
सुषुप्ते अग्रहणम् अन्यासक्तवत् इति चेत्।

**सिद्धान्ती**
न। सर्वाग्रहणात्।

**पूर्वपक्षी**
जाग्रत्स्वप्नयोः अन्यस्य ग्रहणात् सत्वमेवेति चेत्।

**सिद्धान्ती**
न। अविद्या-कृतत्वाद् जाग्रत्स्वप्नयोः। यदन्य-ग्रहणं जाग्रत्स्वप्नयोः, तद् अविद्या-कृतम्। अविद्या-भावे भावात्।

(अविद्या-अभावेऽभावात्।)

**पूर्वपक्षी**
सुषुप्ते अग्रहणमपि अविद्या-कृतम् इति चेत्।

**सिद्धान्ती**

**द्वैताग्रहणमात्मनः स्वतःसिद्धम्**

१२५) न। स्वाभाविकत्वात्। द्रव्यस्य हि तत्त्वम् अविक्रिया, परानपेक्षत्वात्। विक्रिया न तत्त्वम्। परापेक्षत्वात्। न हि कारकापेक्षं वस्तुनः तत्त्वम्। सतो विशेषः कारकापेक्षः। विशेषश्च विक्रिया। जाग्रत्स्वप्नयोः च ग्रहणं विशेषः। यद्धि यस्य नान्यापेक्षं स्वरूपम्, तत्तस्य तत्त्वम्। यदन्यापेक्षम्, न तत् तत्त्वम्। अन्याभावे अभावात्। तस्मात् स्वाभाविकत्वात् जाग्रत्स्वप्नवत् न सुषुप्ते विशेषः।

**द्वैतपक्षे न भयनिवृत्तिः**

१२६) येषां पुनः ईश्वरः अन्यः आत्मनः, कार्यं च अन्यत्, तेषां भयानिवृत्तिः। भयस्य अन्य-निमित्तत्वात्। सतश्च अन्यस्य आत्महानानुपपत्तिः। न च असतः आत्म-लाभः।

**आक्षेपः**

सापेक्षस्य अन्यस्य भय-हेतुत्वमिति चेत्।

**समाधानम्**

न। तस्यापि तुल्यत्वात्। यद्धर्माद्यन्यत् सहायभूतं नित्यमनित्यं वा निमित्तमपेक्ष्य अन्यद् भय-कारणं स्यात्। तस्यापि तथा-भूतस्य आत्महानाभावात् भयानिवृत्तिः।

आत्महाने वा सदसतोः इतरेतरापत्तौ सर्वत्र अनाश्वासः एव त्वत्पक्षे। एकत्व-पक्षे पुनः सनिमित्तस्य संसारस्य अविद्या-कल्पितत्वाद् अदोषः। तैमिरिक-दृष्टस्य हि द्वितीय-चन्द्रस्य न आत्म-लाभो नाशो वा अस्ति।

**विद्याविद्ये नात्मधर्मौ**

**आक्षेपः**

१२७) विद्याविद्ययोः तद्धर्मत्वमिति चेत्।

**समाधानम्**

न। प्रत्यक्षत्वात्। विवेकाविवेकौ रूपादिवत् प्रत्यक्षौ उपलभ्येते अन्तःकरणस्थौ।

न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृ-धर्मत्वम्। अविद्या च स्वानुभवेन निरूप्यते - 'मूढोऽहम्' 'अविविक्तं मम विज्ञानम्' इति। तथा विद्या-विवेकः अनुभूयते। उपदिशन्ति च अन्येभ्यः आत्मनः विद्यां बुधाः।

तथा च अन्ये अवधारयन्ति। तस्माद् नाम-रूप-पक्षस्यैव विद्याविद्ये। नाम-रूपे च नात्मधर्मौ।

"(आकाशो वै नाम) नाम-रूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म" (छा. ८.१४.१) इति श्रुत्यन्तरात्।

ते च पुनर्नाम-रूपे सवितर्यहोरात्रे इव कल्पिते। न परमार्थतो विद्यमाने।

**सङ्क्रमणशब्दस्य विज्ञानमात्रार्थत्वं न तु मुख्यार्थत्वम्**

**आक्षेपः**

१२८) अभेदे “एतमानन्दमयमात्मानमुपसङ्क्रामति” इति कर्म-कर्तृत्वानुपपत्तिः इति चेत्।

**समाधानम्**

न। विज्ञान-मात्रत्वात् सङ्क्रमणस्य। न जलूकादिवत् सङ्क्रमणमिह उपदिश्यते।

किं तर्हि**?** विज्ञान-मात्रं सङ्क्रमण-श्रुतेः अर्थः।

**आक्षेपः**

ननु मुख्यमेव सङ्क्रमणं श्रूयते उपसङ्क्रामति इति चेत्।

**समाधानम्**

न। अन्नमये अदर्शनात्, न मुख्यमेव सङ्क्रमणम्।

न हि अन्नमयमुपसङ्क्रामतः बाह्याद् अस्माल्लोकाद् जलूकावत् सङ्क्रमणं दृश्यते, अन्यथा वा।

**आक्षेपः**

मनोमयस्य बहिर्निर्गतस्य विज्ञानमयस्य वा पुनः प्रत्यावृत्य आत्म-सङ्क्रमणम् इति चेत्।

**समाधानम्**

न। स्वात्मनि क्रिया-विरोधात्। अन्यः अन्नमयम् अन्यम् उपसङ्क्रामति इति प्रकृत्य मनोमयः विज्ञानमयः वा स्वात्मानमेव उपसङ्क्रामति इति विरोधः स्यात्। तथा, न आनन्दमयस्य आत्म-सङ्क्रमणम् उपपद्यते। तस्मान्न प्राप्तिः सङ्क्रमणम्। नापि अन्नमयादीनाम् अन्यतम-कर्तृकम्। पारिशेष्यात्, अन्नमयाद्यानन्दमयान्तात्म-व्यतिरिक्त-कर्तृकं ज्ञान-मात्रं च सङ्क्रमणम् उपपद्यते।

**सङ्क्रमणशब्दस्य विज्ञानमात्रार्थत्वोपपत्तिः**

१२९) ज्ञान-मात्रत्वे च आनन्दमयान्तस्थस्य एव सर्वान्तरस्य आकाशाद्यन्नमयान्तं कार्यं सृष्ट्वा अनुप्रविष्टस्य हृदय-गुहाभिसम्बन्धाद् अन्नमयादिषु अनात्मसु आत्म-विभ्रमः सङ्क्रमणेन आत्म-विवेक-विज्ञानोत्पत्त्या विनश्यति। तदेतस्मिन् अविद्या-विभ्रम-नाशे सङ्क्रमण-शब्दः उपचर्यते। न हि अन्यथा सर्व-गतस्य आत्मनः सङ्क्रमणम् उपपद्यते। वस्त्वन्तराभावाच्च। न च स्वात्मनः एव सङ्क्रमणम्। न हि जलूका आत्मानमेव सङ्क्रामति।

**सङ्क्रमणवाक्यार्थोपसंहारः**

१३०) तस्मात् सत्यं ज्ञानमनन्तं ब्रह्म इति यथोक्त-लक्षण-आत्म-प्रतिपत्त्यर्थमेव बहुभवन-सर्गप्रवेश-रसलाभ-

अभय-सङ्क्रमणादि परिकल्प्यते ब्रह्मणि सर्व-व्यवहार-अविषये।

न तु परमार्थतो निर्विकल्पे ब्रह्मणि कश्चिदपि विकल्पः उपपद्यते।

तमेतं निर्विकल्पम् आत्मानम् एवं क्रमेण उपसङ्क्रम्य विदित्वा न बिभेति कुतश्चन।

अभयं प्रतिष्ठां विन्दते इत्येतस्मिन् अर्थे अपि एषः श्लोकः भवति।

सर्वस्यैव अस्य प्रकरणस्य आनन्दवल्ल्यर्थस्य संक्षेपतः प्रकाशनाय एषः मन्त्रः भवति।। ८ ।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-
आनन्दवल्ली-भाष्ये अष्टमोऽनुवाकः।।

नवमोऽनुवाकः

**यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति।**

**एतꣳह वाव न तपति। किमहꣳसाधु नाकरवम्। किमहं पापमकरवमिति।**

**स य एवं विद्वानेते आत्मानꣳस्पृणुते। उभे ह्येवैष एते आत्मानꣳस्पृणुते। य एवं वेद। इत्युपनिषत्॥**

**२.९॥**

**आनन्दवल्ल्यर्थप्रकाशकः मन्त्रः**

१३१) यतः यस्मात् निर्विकल्पात्, यथोक्त-लक्षणात्, अद्वयानन्दात्, आत्मनः वाचः अभिधानानि द्रव्यादि-

सविकल्प-वस्तु-विषयाणि वस्तु-सामान्याद् निर्विकल्पे अद्वये अपि ब्रह्मणि प्रयोक्तृभिः प्रकाशनाय प्रयुज्यमानानि।

अप्राप्य अप्रकाश्य एव। निवर्त्तन्ते स्व-सामर्थ्याद् हीयन्ते। मनः इति प्रत्ययः, विज्ञानम्।

तच्च यत्राभिधानं प्रवृत्तम् अतीन्द्रियेऽप्यर्थे तदर्थे च प्रवर्त्तते प्रकाशनाय। यत्र च विज्ञानम्, तत्र वाचः प्रवृत्तिः।

तस्मात् सहैव वाङ्-मनसयोः अभिधान-प्रत्यययोः प्रवृत्तिः सर्वत्र।

तस्माद् ब्रह्म-प्रकाशनाय सर्वथा प्रयोक्तृभिः प्रयुज्यमानाः अपि वाचः यस्माद् अप्रत्यय-विषयात्, अनभिधेयात्,

अदृश्यादि-विशेषणात् सह एव मनसा विज्ञानेन सर्व-प्रकाशन-समर्थेन निवर्त्तन्ते तं ब्रह्मणः आनन्दं श्रोत्रियस्य अवृजिनस्य अकामहतस्य सर्वैषणा-विनिर्मुक्तस्य आत्मभूतं विषय-विषयि-सम्बन्ध-विनिर्मुक्तं स्वाभाविकं नित्यम् अविभक्तं परमानन्दं ब्रह्मणः विद्वान् यथोक्तेन विधिना न बिभेति कुतश्चन निमित्ताभावात्। न हि तस्माद् विदुषः अन्यद्वस्त्वन्तरमस्ति भिन्नं यतो बिभेति। अविद्यया यदा "उदरमन्तरं कुरुते, अथ तस्य भयं भवति" (तै. २.७) इति हि उक्तम्। विदुषस्तु अविद्या-कार्यस्य तैमिरिक-दृष्ट-द्वितीय-चन्द्रवत्, नाशाद् भय-निमित्तस्य, 'न बिभेति कुतश्चन' इति युज्यते।

**मन्त्रस्य पौनरुक्त्याशङ्कायाः परिहारः**

१३२) मनोमये च उदाहृतः मन्त्रः मनसः ब्रह्म-विज्ञान-साधनत्वात् तत्र ब्रह्मत्वमध्यारोप्य तत्स्तुत्यर्थं "न बिभेति कदाचन" (तै. २.७) इति भय-मात्रं प्रतिषिद्धम्।

इह तु अद्वैत-विषये ‘न बिभेति कुतश्चन’ इति भय-निमित्तमेव प्रतिषिध्यते।

**भयनिमित्ताशङ्कानिषेधः**
१३३) ननु अस्ति भय-निमित्तं साध्वकरणं पाप-क्रिया च। नैवम्। कथमिति**?** उच्यते।

- एतं यथोक्तम् एवं-विदम्। ‘ह’ ‘वाव’ इति अवधारणार्थौ। न तपति नोद्वेजयति, न सन्तापयति।

कथं पुनः साध्वकरणं पाप-क्रिया च न तपति इति**?** उच्यते।

किं कस्मात् साधु शोभनं कर्म नाकरवं न कृतवानस्मि इति पश्चात्सन्तापः भवति आसन्ने मरण-काले।

तथा किं कस्मात् पापं प्रतिषिद्धं कर्म अकरवं कृतवानस्मि इति च नरक-पतनादि-दुःख-भयात् तापः भवति।

ते एते साध्वकरण-पाप-क्रिये एवम् एतं न तपतः, यथा अविद्वांसं तपतः।

कस्माद् पुनः विद्वांसं न तपतः इति? उच्यते। स य एवं विद्वान् एते साध्वसाधुनी ताप-हेतू इति आत्मानं स्पृणुते

प्रीणयति, बलयति वा। परमात्म-भावेन उभे पश्यति इत्यर्थः।

उभे पुण्य-पापे हि यस्मादेवम् एषः विद्वान् एते आत्मानम् आत्म-रूपेण एव पुण्य-पापे स्वेन विशेष-रूपेण शून्ये

कृत्वा आत्मानं स्पृणुते एव। कः? य एवं वेद यथोक्तमद्वैतमानन्दं ब्रह्म वेद।

तस्य आत्म-भावेन दृष्टे पुण्य-पापे निर्वीर्ये अतापके जन्मान्तरारम्भके न भवतः।

**आनन्दवल्ल्युपसंहारः**

१३४) इति इयमेवं यथोक्ता अस्यां वल्ल्यां ब्रह्म-विद्या उपनिषत्। सर्वाभ्य विद्याभ्यः परम-रहस्यं दर्शितमित्यर्थः।

परं श्रेयः अस्यां निषण्णमिति वा।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-आनन्दवल्ली-भाष्ये नवमोऽनुवाकः।।